ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः, हरिः ओं

# 3.कृष्ण यजुर्वेदीय तैत्तिरीय ब्राह्मणे तृतीयाष्टकं

## 3.10 तैत्तरीय यजुर्ब्राह्मणे काठके प्रथमः प्रश्नः( सावित्रचयनम्)

### 3.10.1 अनुवाकं 1 –अनुवाकेषु नवसु लेखासु नाभ्यां चेष्टकोपधानं स्वयमातृण्णोपधानं चोच्यते

**T.B.3.10.1.1**

संज्ञानं ँविज्ञानं प्रज्ञानं जानदभिजानत् ।

संकल्पमानं प्रकल्पमान–मुपकल्पमान–मुपक्लृप्तं क्लृप्तं ।

श्रेयो वसीय आयथ्संभूतं भूतं ॥ चित्रः केतुः प्रभानाभान्थ् संभान् ।

ज्योतिष्मा॑–स्तेजस्वानातप॑–स्तपन्नभितपन्न् ।

रोचनो रोचमानः–शोभनः–शोभमानः कल्याणः ॥

दर्.शा दृष्टा दर्.शता विश्वरूपा सुदर्.शना ।

आप्यायमाना प्यायमाना–प्याया सूनृतेरा ।

आपूर्यमाणा पूर्यमाणा पूरयन्ती पूर्णा पौर्णमासी ॥

दाता प्रदाताऽऽनन्दो मोदः प्रमोदः । **1 (10)**

**T.B.3.10.1.2**

आवेशय-न्निवेशयन्थ्सम्ँवेशनः स७ँशान्तः शान्तः ।
आभवन् प्रभवन्-थ्संभवन्-थ्संभूतो भूतः ॥
प्रस्तुतं ँविष्टुत७ँ स७ँस्तुतं कल्याणं ँविश्वरूपं ।
शुक्रममृतं तेजस्वि तेजः समिद्धं ।
अरुणं भानुमन् मरीचिमदभितपत् तपस्वत् ॥
सविता प्रसविता दीप्तो दीपयन् दीप्यमानः ।
ज्वलं ज्वलिता तपन् वितपन्-थ्सन्तपन्न् ।
रोचनो रोचमानः शुंभूः शुंभमानो वामः ॥
सुता सुन्वती प्रसुता सूयमाना ऽभिषूयमाणा ।
पीती प्रपा संपा तृप्ति-स्तर्पयन्ती । **2 (10)**

**T.B.3.10.1.3**

कान्ता काम्या कामजाता ऽऽयुष्मती कामदुघा ॥
अभिशास्ता ऽनुमन्ता-ऽऽनन्दो मोदः प्रमोदः ।
आसादयन् निषादयन्-थ्स७ँसादनः स७ँसन्नः सन्नः ।
आभू र्विभूः प्रभूः शंभू र्भुवः ॥ पवित्रं पवयिष्यन् पूतो मेद्ध्यः ।

यशो यशस्वा-नायुरमृतः । जीवो जीविष्यन् थ्स्वर्गो लोकः ॥
सहस्वान् थ्सहीया-नोजस्वान् थ्सहमानः ।
जयन्न-भिजयन्-थ्सुद्रविणो द्रविणोदाः ।
आर्द्रपवित्रो हरिकेशो मोदः प्रमोदः ॥ **3 (10)**

**T.B.3.10.1.4**

अरुणो ऽरुणरजाः पुण्डरीको विश्वजिद-भिजित् ।
आर्द्रः पिन्वमानो ऽन्नवान्-रसवा-निरावान् ।
सर्वौषधः संभरो महस्वान् ॥ एजत्का जोवत्काः ।
क्षुल्लकाः शिपिविष्टकाः ।
सरिस्त्रराः सुशेरवः । अजिरासो गमिष्णवः ॥
इदानीं तदानी-मेतर्.हि क्षिप्रमजिरं ।
आशु र्निमेषः फणो द्रवन्नति-द्रवन्न् ।
त्वर७ स्त्वरमाण आशुराशीयाञ्जवः {आशुराशीयान् जवः} ( ) ॥
अग्निष्टोम उक्थ्यो ऽतिरात्रो द्विरात्र-स्त्रिरात्र-श्चतूरात्रः ।
अग्निर्. ऋतुः सूर्य ऋतुश्चन्द्रमा ऋतुः ॥

प्रजापतिः सम्ँवथ्सरो महान्कः ॥ **4 (13)**

*(प्रमोद – स्तर्पयन्ती – प्रमोदो – जवस्त्रीणि च) (A1)*

**3.10.2** अनुवाकं 2 –अनुवाकेषु नवसु लेखासु नाभ्यां चेष्टकोपधानं स्वयमातृण्णोपधानं चोच्यते

**T.B.3.10.2.1**

भूरग्निं च पृथिवीं च मां च । त्रीꣳश्च लोकान् थ्सम्ँवथ्सरं च ।

प्रजापतिस्त्वा सादयतु । तया देवतया ऽङ्गिरस्वद्–ध्रुवा सीद ॥

भुवो वायुं चान्तरिक्षं च मां च । त्रीꣳश्च लोकान् थ्सम्ँवथ्सरं च ।

प्रजापतिस्त्वा सादयतु । तया देवतयाऽ ङ्गिरस्वद् ध्रुवा सीद ।

स्वरादित्यं च दिवं च मां च । त्रीꣳश्च लोकान् थ्सम्ँवथ्सरं च ( ) ।

प्रजापतिस्त्वा सादयतु । तया देवतया ऽङ्गिरस्वद् ध्रुवा सीद ।

भूर्भुवः स्व–श्चन्द्रमसं च दिशश्च मां च ।

त्रीꣳश्च लोकान् थ्संवथ्सरं च । प्रजापतिस्त्वा सादयतु ।

तया देवतया ऽङ्गिरस्वद् ध्रुवा सीद ॥ **5 (16)**

*(सम्ँवथ्सरं च षट् च)(A2)*

**3.10.3** अनुवाकं 3 –अनुवाकेषु नवसु लेखासु नाभ्यां चेष्टकोपधानं स्वयमातृण्णोपधानं चोच्यते

**T.B.3.10.3.1**

त्वमेव त्वां ँवेत्थ योऽसि सोऽसि । त्वमेव त्वामचैषीः ।

चितश्चासि संचित–श्चास्यग्ने । एतावाꣳश्चासि भूयाꣳश्चास्यग्ने ।

यत्ते अग्ने न्यूनं ँयदु तेऽतिरिक्तं । आदित्या–स्तदंङ्गिरस–श्चिन्वन्तु ।

विश्वे ते देवाश्चिति–मापूरयन्तु । चितश्चासि संचित–श्चास्यग्ने ।

एतावाꣳश्चासि भूयाꣳश्चास्यग्ने ।

मा ते अग्ने ऽचयेन माऽति च येनायुरावृक्षि ( ) ।

सर्वेषां ज्योतिषां ज्योति र्यददावुदेति । तपसो जातमनि–भृष्टमोजः।

तत्ते ज्योतिरिष्टके । तेन मे तप । तेन मे ज्वल । तेन मे दीदिहि ।

यावद्देवाः । यावदसाति सूर्यः । यावदुतापि ब्रह्म ॥ **6 (19)**

*(आवृक्षि नव च) (A3)*

**3.10.4 अनुवाकं 4 –अनुवाकेषु नवसु लेखासु नाभ्यां चेष्टकोपधानं स्वयमातृण्णोपधानं चोच्यते**

**T.B.3.10.4.1**

सम्ँवथ्सरोऽसि परिवथ्सरोऽसि । इदावथ्सरोऽसी–दुवथ्सरोऽसि ।

इद्वथ्सरोऽसि वथ्सरोऽसि । तस्य ते वसन्तः शिरः ।

ग्रीष्मो दक्षिणः पक्षः । वर्.षाः पुच्छं । शरदुत्तरः पक्षः ।

हेमन्तो मद्ध्यं । पूर्वपक्षाश्चितयः । अपरपक्षाः पुरीषं । **7 (10)**

**T.B.3.10.4.2**

अहोरात्रा–णीष्टकाः । ऋषभोऽसि स्वर्गो लोकः ।

यस्यां दिशि महीयसे । ततो नो मह आवह ।

वायु र्भूत्वा सर्वा दिश आवाहि । सर्वा दिशोऽनु विवाहि ।

सर्वा दिशोऽनु सम्ँवाहि । चित्त्या चिति–मापृण ।

अचित्त्या चिति–मापृण । चिदसि समुद्रयोनिः । **8 (10)**

**T.B.3.10.4.3**

इन्दु र्दक्षः श्येन ऋतावा । हिरण्यपक्षः शकुनो भुरण्युः ।

महान् थ्सधस्थे ध्रुव आनिषत्तः ।

नमस्ते अस्तु मा मा हिँसीः । एति प्रेति वीति समित्युदिति ।

दिवं मे यच्छ । अन्तरिक्षं मे यच्छ । पृथिवीं मे यच्छ ।

पृथिवीं मे यच्छ । अन्तरिक्षं मे यच्छ ( ) । दिवं मे यच्छ ।

अह्ना प्रसारय । रात्र्या समच । रात्र्या प्रसारय । अह्ना समच ।

कामं प्रसारय । कामꣳ समच ॥ **9 (17)**

*(पुरीषꣳ – समुद्रयोनिः – पृथिवीं मे यच्छान्तरिक्षं मे यच्छ सप्त च)*

*(A4)*

**3.10.5** अनुवाकं 5 –अनुवाकेषु नवसु लेखासु नाभ्यां चेष्टकोपधानं स्वयमातृण्णोपधानं चोच्यते

**T.B.3.10.5.1**

भूर्भुवः स्वः । ओजो बलं । ब्रह्म क्षत्रं । यशो महत् ।

सत्यं तपो नाम । रूप–ममृतं । चक्षुः श्रोत्रं । मन आयुः ।

विश्वं ँयशो महः । समं तपो हरो भाः ( ) ।

जातवेदा यदि वा पावकोऽसि । वैश्वानरो यदि वा वैद्युतोऽसि ।

शं प्रजाभ्यो यजमानाय लोकं ।

ऊर्जं पुष्टिं दद–दभ्याववृथ्स्व ॥ **10 (14)**

*(भाश्चत्वारि च) (A5)*

**3.10.6** अनुवाकं 6 –अनुवाकेषु नवसु लेखासु नाभ्यां चेष्टकोपधानं स्वयमातृण्णोपधानं चोच्यते

**T.B.3.10.6.1**

राज्ञी विराज्ञी । सम्राज्ञी स्वराज्ञी । अर्चिः शोचिः ।

तपो हरो भाः । अग्नि–रिन्द्रो बृहस्पतिः । विश्वे देवा भुवनस्य गोपाः ।

ते मा सर्वे यशसा स॒ꣳसृजन्तु ॥ **11 (7)**

*(राज्ञीन्द्रो मा सप्त (A6)*

**3.10.7** अनुवाकं 7 –अनुवाकेषु नवसु लेखासु नाभ्यां चेष्टकोपधानं स्वयमातृण्णोपधानं चोच्यते

**T.B.3.10.7.1**

असवे स्वाहा वसवे स्वाहा । विभुवे स्वाहा विवस्वते स्वाहा ।

अभिभुवे स्वाहा–ऽधिपतये स्वाहा ।

दिवांपतये स्वाहा ऽꣳहस्पत्याय स्वाहा ।

चाक्षुष्मत्याय स्वाहा ज्योतिष्मत्याय स्वाहा ।

राज्ञे स्वाहा विराज्ञे स्वाहा । सम्राज्ञे स्वाहा स्वराज्ञे स्वाहा ।

शूषाय स्वाहा सूर्याय स्वाहा । चन्द्रमसे स्वाहा ज्योतिषे स्वाहा ।

स॒ꣳस॒र्पाय॒ स्वाहा॑ क॒ल्याणा॒य॒ स्वाहा ( )।

अ॒र्जु॒नाय॒ स्वाहा॑ ॥ **12 (11)**

*(क॒ल्याणा॒य॒ स्वा॒हैकं॑ च) (A7)*

**3.10.8** अनुवाकं 8 -अनुवाकेषु नवसु लेखासु नाभ्यां चेष्टकोपधानं स्वयमातृण्णोपधानं चोच्यते

**T.B.3.10.8.1**

वि॒प॒श्चि॒ते॒ पव॑मानाय गायत । म॒ही न धारा ऽत्यन्धो॑ अर्.षति ।

अहि॑र्.ह जी॒र्णामतिसर्प॑ति॒ त्वचं॑ । अत्यो॒ न क्रीडन्न स॒रद्वृ॒षा॒ हरिः॑ ।

उ॒प॒या॒मगृ॑हीतोऽसि मृ॒त्यवे॑ त्वा॒ जुष्टं॑ गृह्णामि ।

ए॒ष॒ ते यो॒नि॑र्मृत्यवे॑ त्वा ॥ अप॑ मृत्यु-मप॒क्षु॒धं॑ । अपे॒तः शपथं॑ जहि ।

अधा॑ नो अग्न॒ आव॑ह । रा॒यस्पोषꣳ॑ स॒हस्रिणं॑ । **13 (10)**

**T.B.3.10.8.2**

ये॑ ते॑ स॒ह॒स्रम॒यु॒तं पाशाः॑ । मृत्यो॒ मर्त्या॒य॒ हन्तवे ।

तान्. य॒ज्ञस्य॑ माय॒या॑ । सर्वा॒नव॑ यजामहे ॥ भ॒क्षो॑ ऽस्यमृत भ॒क्षः ।

तस्य॑ ते मृ॒त्यु॒-पीतस्या॒॑-मृतवतः । स्व॒गा॑-कृ॒तस्य॒ मधुमतः ।

उप॑हू॒तस्यो॑-पहूतो भक्षयामि ॥

म॒न्द्रा ऽभिभू॑तिः के॒तु य॒ज्ञा॒नां॒ँवाक् । अस॒ावे॑हि । **14 (10)**

**T.B.3.10.8.3**

अन्धो जागृविः प्राण । असावेहि । बधिर आक्रन्दयित-रपान ।

असावेहि । अहस्तोस्त्वा चक्षुः । असावेहि । अपादाशो मनः ।

असावेहि । कवे विप्रचित्ते श्रोत्र । असावेहि । **15 (10)**

**T.B.3.10.8.4**

सुहस्तः सुवासाः । शूषो नामास्य-मृतो मर्त्येषु ।

तन्त्वाऽहं तथा वेद । असावेहि । अग्निर्मे वाचि श्रितः ।

वाग्घृदये । हृदयं मयि । अहममृते ।

अमृतं ब्रह्मणि । वायुर्मे प्राणे श्रितः । **16 (10)**

**T.B.3.10.8.5**

प्राणो हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि ।

सूर्यो मे चक्षुषि श्रितः । चक्षुर्. हृदये । हृदयं मयि । अहममृते ।

अमृतं ब्रह्मणि । चन्द्रमा मे मनसि श्रितः । **17 (10)**

**T.B.3.10.8.6**

मनो हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि ।

दिशो मे श्रोत्रे श्रिताः । श्रोत्रꣳ हृदये । हृदयं मयि । अहममृते ।

अमृतं ब्रह्मणि । आपो मे रेतसि श्रिताः । **18 (10)**

**T.B.3.10.8.7**

रेतो हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि ।

पृथिवी मे शरीरे श्रिता । शरीरꣳ हृदये । हृदयं मयि । अहममृते ।

अमृतं ब्रह्मणि । ओषधिवनस्पतयो मे लोमसु श्रिताः । 19 (10)

**T.B.3.10.8.8**

लोमानि हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि ।

इन्द्रो मे बले श्रितः । बलꣳ हृदये । हृदयं मयि । अहममृते ।

अमृतं ब्रह्मणि । पर्जन्यो मे मूर्द्ध्नि श्रितः । 20 (10)

**T.B.3.10.8.9**

मूर्द्धा हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि ।

ईशानो मे मन्यौ श्रितः । मन्युर्. हृदये । हृदयं मयि । अहममृते ।

अमृतं ब्रह्मणि । आत्मा म आत्मनि श्रितः( ) । 21 (10)

**T.B.3.10.8.10**

आत्मा हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि ।

पुनर्म आत्मा पुनरायुरागात् । पुनः प्राणः पुनराकूत–मागात् ।

वैश्वानरो रश्मिभि र्वावृधानः । अन्तस्तिष्ठत्वमृतस्य गोपाः ॥ 22 (8)

*(सहस्रिण – मिहि – श्रोत्रासावेहि – प्राणे श्रितो – मनसि श्रितो – रेतसि श्रिता – लोमसु श्रिता – मूर्द्ध्नि श्रित – आत्मनि श्रितो – ऽष्टौ च) (A8)*

| Special Korvai |
|---|
| (अग्निर् वायुः सूर्य श्चन्द्रमा दिश आपः पृथि व्योषधिवनस्पतय इन्द्रः पर्जन्य ईशान आत्मा पुनर्मे त्रयोदश) |

**3.10.9** अनुवाकं 9 –अनुवाकेषु नवसु लेखासु नाभ्यां चेष्टकोपधानं स्वयमातृण्णोपधानं चोच्यते

**T.B.3.10.9.1**

प्रजापति र्देवानसृजत । ते पाप्मना संदिता अजायन्त ।
तान् व्यद्यत् । यद् व्यद्यत् । तस्माद् विद्युत् । तमवृश्चत् ।
यदवृश्चत् । तस्माद् वृष्टिः । तस्माद् यत्रैते देवते अभिप्राप्नुतः ।
विच हैवास्य तत्र पाप्मानन्द्यतः । **23 (10)**

**T.B.3.10.9.2**

वृश्चतश्च ॥ सैषा मीमाꣳसाऽग्निहोत्र एव संपन्ना । अथो आहुः ।
सर्वेषु यज्ञक्रतुष्विति ॥ होष्यन्नप उपस्पृशेत् ।
विद्युदसि विद्यमे पाप्मानमिति । अथ हुत्वोपस्पृशेत् ।

वृष्टिरसि वृश्च मे पाप्मानमिति ।

यक्ष्यमाणो वेष्ट्वा वा । वि च हैवास्यैते देवते पाप्मानं घ्नतः । **24 (10)**

**T.B.3.10.9.3**

वृश्चतश्च ॥ अत्यꣳहो हारुणिः । ब्रह्मचारिणे प्रश्नान् प्रोच्य प्रजिघाय ।

परेहि । प्लक्षं दैयां (दैय्यां) पातिं पृच्छ ।

वेत्थ सावित्रां(3) न वेत्था(3) इति ।

तमागत्य पप्रच्छ । आचार्यो मा प्राहैषीत् ।

वेत्थ सावित्रां(3) न वेत्था(3) इति । सहोवाच वेदेति ॥ **25 (10)**

**T.B.3.10.9.4**

स कस्मिन् प्रतिष्ठित इति । परोरजसीति ।

कस्तद्यत् परोरजा इति । एष वाव स परोरजा इति होवाच ।

य एष तपति । एषो ऽर्वाग्रजा इति । स कस्मिन् त्वेष इति ।

सत्य इति । किं तथ्सत्यमिति । तप इति । **26 (10)**

**T.B.3.10.9.5**

कस्मिन्नु तप इति । बल इति ।

किं तद् बलमिति । प्राण इति ।

मास्म प्राणमति पृच्छ इति माऽऽचार्यो ऽब्रवीदिति होवाच ब्रह्मचारी ॥

सहोवाच प्लक्षो दैयां (दैय्यां) पातिः ।
यद्वै ब्रह्मचारिन् प्राणमत्यप्रक्ष्यः । मूर्द्धा ते व्यपतिष्यत् ।
अहमुत आचार्या-च्छ्रेयान् भविष्यामि ।
यो मा सावित्रे समवादिष्टेति । **27 (10)**

**T.B.3.10.9.6**

तस्माथ् सावित्रे न सम्ँवदेत ॥
स यो हवै सावित्रं ँविदुषा सावित्रे सम्ँवदते ।
सहास्मि-ञ्छ्रियं दधाति ।
अनु हवा अस्मा असौ तपञ्छ्रियं मन्यते ।
अन्वस्मै श्रीस्तपो मन्यते । अन्वस्मै तपो बलं मन्यते ।
अन्वस्मै बलं प्राणं मन्यते ॥ स यदाह ।
संज्ञानं ँविज्ञानं दर्.शा दृष्टेति । एष एव तत् ॥ **28 (10)**

**T.B.3.10.9.7**

अथ यदाह । प्रस्तुतं ँविष्टुतꣳ सुता सुन्वतीति । एष एव तत् ॥
एष ह्येव तान्यहानि । एष रात्रयः ॥ अथ यदाह ।
चित्रः केतु र्दाता प्रदाता सविता प्रसविता ऽभिशास्ता ऽनुमन्तेति ।

एष एव तत् । एष ह्येव तेऽह्नो मुहूर्ताः ।

एष रात्रेः ॥ **29 (10)**

**T.B.3.10.9.8**

अथ यदाह । पवित्रं पवयिष्यन्–थ्सहस्वान्–थ्सहीयानरुणो

ऽरुणरजा इति । एष एव तत् । एष ह्येव ते ऽर्द्धमासाः ।

एष मासाः ॥ अथ यदाह ।

अग्निष्टोम उक्थ्योऽग्निर्. ऋतुः प्रजापतिः सम्ँवथ्सर इति ।

एष एव तत् । एष ह्येव ते यज्ञक्रतवः । एष ऋतवः । **30 (10)**

**T.B.3.10.9.9**

एष सम्ँवथ्सरः ॥ अथ यदाह । इदानीं तदानीमिति । एष एव तत् ।

एष ह्येव ते मुहूर्तानां मुहूर्ताः ॥ जनको ह वै देहः ।

अहोरात्रैः समाजगाम । त७ँ होचुः । यो वा अस्मान्. वेद ।

विजहत्–पाप्मानमेति । **31 (10)**

**T.B.3.10.9.10**

सर्व–मायुरेति । अभि स्वर्गं ँलोकं जयति ।

नास्या–मुष्मिन् ँलोकेऽन्नं क्षीयत इति ॥ विजहद्ध वै पाप्मानमेति ।

सर्वमायुरेति । अभि स्वर्गं ँलोकं जयति ।

नास्या–मुष्मिन् ँल्लोके ऽन्नं क्षीयते ।

य एवं ँवेद ॥ अहीना हाश्वत्थ्यः । सावित्रं ँविदां चकार । **32 (10)**

**T.B.3.10.9.11**

स ह ह॒ꣳसो हिरण्मयो भूत्वा । स्वर्गं ँलोकमियाय ।

आदित्यस्य सायुज्यं ॥ ह॒ꣳसो हवै हिरण्मयो भूत्वा ।

स्वर्गं ँलोकमेति । आदित्यस्य सायुज्यं । य एवं ँवेद ॥

देवभागो ह श्रौतर्.षः । सावित्रं ँविदां चकार ।

तꣳ ह वागदृश्यमाना ऽभ्युवाच । **33 (10)**

**T.B.3.10.9.12**

सर्वम्बत गौतमो वेद । यः सावित्रं ँवेदेति । स होवाच ।

कैषा वागसीति । अयमहꣳ सावित्रः । देवाना–मुत्तमो लोकः ।

गुह्यं महो बिभ्रदिति । एतावति ह गौतमः ।

यज्ञोपवीतं कृत्वा–ऽधो निपपात । नमो नम इति । **34 (10)**

**T.B.3.10.9.13**

स होवाच । मा भैषी गौतम । जितो वै ते लोक इति ॥

तस्माद्ये के च सावित्रं ँविदुः । सर्वे ते जितलोकाः ॥

स यो हवै सावित्र–स्याष्टाक्षरं पदꣳ श्रिया ऽभिषिक्तं ँवेद ।

श्रिया हैवाभिषिच्यते । घृणिरिति द्वे अक्षरे ।

सूर्य इति त्रीणि । आदित्य इति त्रीणि । **35 (10)**

**T.B.3.10.9.14**

एतद्वै सावित्र–स्याष्टाक्षरं पद७ श्रियाभिषिक्तं । य एवं वेद ।

श्रिया हैवाभिषिच्यते ॥ तदे–तदृचा–ऽभ्युक्तं ।

ऋचो अक्षरे परमे व्योमन् । यस्मिन् देवा अधि विश्वे निषेदुः ।

यस्तन्न वेद किमृचा करिष्यति । य इत् तद्विदुस्त इमे समासत इति ॥

न हवा एतस्यर्चा न यजुषा न साम्ना–ऽर्थोऽस्ति ।

यः सावित्रं वेद ॥ **36 (10)**

**T.B.3.10.9.15**

तदेतत् परि यद्देवचक्रं । आर्द्रं पिन्वमान७ स्वर्गे लोक एति ।

विजहद् विश्वा भूतानि संपश्यत् ॥

आर्द्रो ह वै पिन्वमानः स्वर्गे लोक एति ।

विजहन् विश्वा भूतानि संपश्यन्न् । य एवं वेद ॥

शूषो हवै वार्ष्णेयः । आदित्येन समाजगाम । त७ होवाच ।

एहि सावित्रं विद्धि ( ) ।

अयं ँवै स्वर्ग्योऽग्निः पारयिष्णु–रमृता–थ्संभूत इति ।
एष वाव स सावित्रः । य एष तपति ।
एहि मां ँविद्धि । इति हैवैनं तदुवाच ॥ **37 (15)**

*(घतो – घतो – वेदेति – तप इति – समवादिष्टेति – तद् – रात्रेर्. – ऋतवः – एति – चकारो – वाच – नम इत्या – दित्य इति त्रीणि – सावित्रं ँवेद – विद्धि पञ्च च) (A9)*

**Special Korvai**
(प्रजापतिर्देवान् संज्ञानं प्रस्तुतं तान्यहान्येष रात्रयास्चित्र केतुस्तेऽह्नो मुहूर्तो रात्रेः पवित्रं तेऽर्ध मासा अग्निष्टोमो यज्ञक्रतव इदानीं मुहूर्तानां जनकोऽहीना देवभागः कैषा वाङ्म शूषो ह वै षोडश)

**3.10.10**अनुवाकं 10 –अनुवाकेषु नवसु लेखासु नाभ्यां चेष्टकोपधानं स्वयमातृण्णोपधानं चोच्यते

**T.B.3.10.10.1**

इयं ँवाव सरघा । तस्या अग्निरेव सारघं मधु ।
या एताः पूर्वपक्षा–परपक्षयो रात्रयः । ता मधुकृतः ।

यान्यहानि । ते मधुवृषाः ।

स यो ह वा एता मधुकृतश्च मधुवृषाँश्च वेद ।

कुर्वन्ति हास्यैता अग्नौ मधु । नास्येष्टापूर्तं धयन्ति ॥

अथ यो न वेद । **38 (10)**

**T.B.3.10.10.2**

न हास्यैता अग्नौ मधु कुर्वन्ति । धयन्त्यस्येष्टापूर्तं ॥

यो ह वा अहोरात्राणा-न्नामधेयानि वेद ।

नाहोरात्रेष्वा-र्तिमार्च्छति । संज्ञानं ँविज्ञानं दर्.शा दृष्टेति ।

एता-वनुवाकौ पूर्वपक्षस्या-होरात्राणां नामधेयानि ।

प्रस्तुतं ँविष्टुतँ सुता सुन्वतीति ।

एतावनु-वाकाव-परपक्षस्या-होरात्राणां नामधेयानि ।

नाहोरात्रेष्वा-र्तिमार्च्छति । य एवं ँवेद ॥ **39 (10)**

**T.B.3.10.10.3**

यो ह वै मुहूर्तानां नामधेयानि वेद । न मुहूर्तेष्वा-र्तिमार्च्छति ।

चित्रः केतु र्दाता प्रदाता सविता प्रसविता ऽभिशास्ता ऽनुमन्तेति ।

एतेऽनुवाका मुहूर्तानां नामधेयानि ।

न मुहूर्तेष्वा–र्तिमार्च्छति । य एवं वेद ॥

यो ह वा अर्द्धमासा–नाञ्च मासानाञ्च नामधेयानि वेद ।

नार्द्धमासेषु न मासेष्वा–र्तिमार्च्छति ।

पवित्रं पवयिष्यन्–थ्सहस्वान्–थ्सहीयानरुणो ऽरुणरजा इति ।

एतेऽनुवाका अर्द्धमासानाञ्च मासानाञ्च नामधेयानि । **40 (10)**

**T.B.3.10.10.4**

नार्द्धमासेषु न मासेष्वा–र्तिमार्च्छति । य एवं वेद ॥

यो ह वै यज्ञक्रतूनां चर्तूनां च सम्वथ्सरस्य च नामधेयानि वेद ।

न यज्ञक्रतुषु नर्तुषु न सम्वथ्सर आर्तिमार्च्छति ।

अग्निष्टोम उक्थ्योऽग्निर्. ऋतुः प्रजापतिः सम्वथ्सर इति ।

एते ऽनुवाका यज्ञक्रतूनां चर्तूनां च सम्वथ्सरस्य च नामधेयानि ।

न यज्ञक्रतुषु नर्तुषु न सम्वथ्सर आर्तिमार्च्छति ।

य एवं वेद ॥ यो ह वै मुहूर्तानां मुहूर्तान्. वेद ।

न मुहूर्तानां मुहूर्तेष्वार्ति मार्च्छति ( ) । **41 (10)**

**T.B.3.10.10.5**

इदानीं तदानीमिति । एते वै मुहूर्तानां मुहूर्ताः ।

न मुहूर्तानां मुहूर्तेष्वार्ति-मार्च्छति । य एवं वेद ॥

अथो यथा क्षेत्रज्ञो भूत्वा ऽनु प्रविश्यान्न-मत्ति ।

एवमेवैतान् क्षेत्रज्ञो भूत्वा ऽनु प्रविश्या-न्नमत्ति ।

स एतेषामेव सलोकता॒ सायुज्य-मश्नुते ।

अप पुनर्मृत्युं जयति । य एवं वेद ॥ **42 (9)**

*(न वेदै - वं वेदा - नुवाका अर्द्धमासानां च मसानां च नामधेयानि - मुहूर्तेष्वार्तिमार्च्छति - +नव च) (A10)*

**Special Korvai**

(इयमहोरात्राणा॒ संज्ञानं पूर्वपक्षस्य प्रस्तुतमपरपक्षस्य मुहूर्तानां चित्रः केतुरर्द्धमासानां पवित्रं यज्ञक्रतूनामग्निष्टोमो यज्ञक्रतूनामि दानीं मुहूर्तानां मुहूर्तान्. वेदेदानीमथो द्वादश)

**3.10.11**अनुवाकं 11 –अनुवाकेषु नवसु लेखासु नाभ्यां चेष्टकोपधानं स्वयमातृण्णोपधानं चोच्यते

**T.B.3.10.11.1**

कश्चिद्ध्वा अस्मा-ल्लोकात् प्रेत्य । आत्मानं ँवेद ।

अय-मह-मस्मीति । कश्चिथ्स्वं ँलोकं न प्रति प्रजानाति ॥

अग्निमुग्धो हैव धुमतान्तः । स्वं ँलोकं न प्रति प्रजानाति ।

अथ यो हैवैत-मग्नि॑ सावित्रं ँवेद ।

स एवास्मा ल्लोकात् प्रेत्य । आत्मानं ँवेद ।

अय-मह-मस्मीति । **43 (10)**

**T.B.3.10.11.2**

स स्वं ँलोकं प्रति प्रजानाति ॥ एष उ वेवैनं तथ्सावित्रः ।

स्वर्गं ँलोक-मभिवहति ॥ अहोरात्रै वा इद॑ सयुग्भिः क्रियते ।

इति रात्राया दीक्षिषत । इति रात्राय व्रत-मुपागुरिति ।

तानि हानेवं ँविदुषः । अमुष्मिन् ँलोके शेवधिं धयन्ति ।

धीत॑ हैव स शेवधि-मनुपरैति ॥

अथ यो हैवैतमग्नि॑ सावित्रं ँवेद । **44 (10)**

**T.B.3.10.11.3**

तस्य हैवा-होरात्राणि । अमुष्मिन् ँल्लोके शेवधिं न धयन्ति ।

अधीतꣳ हैव स शेवधि-मनुपरैति ॥

भरद्वाजो ह त्रिभिरायुर्भि र्ब्रह्मचर्यमुवास ।

तꣳ ह जीर्णिꣳ स्थविरꣳ शयानं ।

इन्द्र उपव्रज्यो वाच । भरद्वाज । यत्ते चतुर्थमायुर्दद्यां ।

किमेनेन कुर्या इति । ब्रह्मचर्यमेवैनेन चरेयमिति होवाच । **45 (10)**

**T.B.3.10.11.4**

तꣳ ह त्रीन् गिरि-रूपान विज्ञातानिव दर्.शयां चकार ।

तेषाꣳ हैकैकस्मान् मुष्टिनाऽऽददे । स होवाच ।

भरद्वाजेत्यामन्त्र्य । वेदा वा एते । अनन्ता वै वेदाः ।

एतद्वा एतै स्त्रिभि-रायुर्भि-रन्ववोचथाः ।

अथ त इतर-दननूक्तमेव । एहीमं ँविद्धि ।

अयं ँवै सर्व विद्येति । **46 (10)**

**T.B.3.10.11.5**

तस्मै हैतमग्निꣳ सावित्रमुवाच । तꣳ स विदित्वा ।

अमृतो भूत्वा । स्वर्गं ँलोकमियाय । आदित्यस्य सायुज्यं ॥

अमृतो हैव भूत्वा । स्वर्गँ लोकमेति । आदित्यस्य सायुज्यं ।

य एवं वेद ॥ एषो एव त्रयी विद्या । **47 (10)**

**T.B.3.10.11.6**

यावन्तꣳ ह वै त्रय्या विद्यया लोकं जयति । तावन्तँ लोकं जयति ।

य एवं वेद ॥ अग्ने र्वा एतानि नामधेयानि ।

अग्नेरेव सायुज्यꣳ सलोकता–माप्नोति ।

य एवं वेद । वायो र्वा एतानि नामधेयानि ।

वायोरेव सायुज्यꣳ सलोकता–माप्नोति ।

य एवं वेद । इन्द्रस्य वा एतानि नामधेयानि । **48 (10)**

**T.B.3.10.11.7**

इन्द्रस्यैव सायुज्यꣳ सलोकता–माप्नोति । य एवं वेद ।

बृहस्पते र्वा एतानि नामधेयानि ।

बृहस्पतेरेव सायुज्यꣳ सलोकता–माप्नोति ।

य एवं वेद । प्रजापते र्वा एतानि नामधेयानि ।

प्रजापतेरेव सायुज्यꣳ सलोकता–माप्नोति । य एवं वेद ।

ब्रह्मणो वा एतानि नामधेयानि ।

ब्रह्मण एव सायुज्यꣳ सलोकता–माप्नोति ( ) ।
य एवं वेद ॥ स वा एषोऽग्नि–रपक्षपुच्छो वायुरेव ।
तस्याग्नि मुखं । असावादित्यः शिरः । स यदेते देवते अन्तरेण ।
तथ्सर्वꣳ सीव्यति । तस्माथ् सावित्रः ॥ **49 (17)**

*(अयमहमस्मीति – वेद – होवाच – सर्वविद्येति – विद्ये – न्द्रस्य वा एतानि नामधेयानि – ब्रह्मण एव सायुज्यꣳ सलोकतामाप्नोति सप्त च) । (A11)*

=================

**Special Korvai**

(अग्नेर्वायोरिन्द्रस्य बृहस्पतेः प्रजापतेर् ब्रह्मणः स वै सप्त)

**Prapaataka Korvai with starting Padams of 1 to 10 Anuvaakams :-**

(संज्ञानं – भू – स्त्वमेव – सम्वँथ्सरोऽसि – भू – राज्य – सव–विपश्चिते – प्रजापतिर् देवा – नियं वाव सरघा – कश्चिद्धैकादश)

**Korvai with starting Padams of 1, 11, 21 Series of Dasinis :-**

(संज्ञान॒ꣳ – राज्ञी – मूर्द्धा हृदय – एष सम्ँवथ्सरो – नार्द्धमासेषु नवचत्वारिꣳशत्)

**First and Last Padam 1st Prapaatakam of Kaatakam:-**

(संज्ञान॒ꣳ – सावित्रः)

॥ हरिः ओं ॥

॥ इति तैत्तरीय यजुर्ब्राह्मणे काठके प्रथमः प्रश्नः समाप्तः ॥

## 3.10 For Kaatakam 1 - (TB 3.10)

| | Dasini | Vaakyams |
|---|---|---|
| Anuvakam 1 | 4 | 43 |
| Anuvakam 2 | 1 | 16 |
| Anuvakam 3 | 1 | 19 |
| Anuvakam 4 | 3 | 37 |
| Anuvakam 5 | 1 | 14 |
| Anuvakam 6 | 1 | 7 |
| Anuvakam 7 | 1 | 11 |
| Anuvakam 8 | 10 | 98 |
| Anuvakam 9 | 15 | 155 |
| Anuvakam 10 | 5 | 49 |
| Anuvakam 11 | 7 | 77 |
| Total → | 49 | 526 |

ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः, हरिः ओं

# 3.कृष्ण यजुर्वेदीय तैत्तिरीय ब्राह्मणे तृतीयाष्टकं

## 3.11 तैत्तरीय यजुर्ब्राह्मणे काठके द्वितीयः प्रश्नः नाचिकेतचयनम्

### 3.11.1 अनुवाकं 1 –इष्टकोपधानमन्त्राः

**T.B.3.11.1.1**

लोकोऽसि स्वर्गोऽसि । अनन्तोऽस्य पारोऽसि ।

अक्षितोऽस्य क्षय्योऽसि । तपसः प्रतिष्ठा । त्वयीदमन्तः ।

विश्वं ँयक्षं ँविश्वं भूतं ँविश्व७ँ सुभूतं ।

विश्वस्य भर्ता विश्वस्य जनयिता । तन्त्वोपदधे कामदुघ–मक्षितं ।

प्रजापतिस्त्वा सादयतु । तया देवतया–ऽङ्गिरस्वद्–ध्रुवा सीद ॥ **1 (10)**

**T.B.3.11.1.2**

तपोऽसि लोके श्रितं । तेजसः प्रतिष्ठा । त्वयीदमन्तः ।

विश्वं ँयक्षं ँविश्वं भूतं ँविश्व७ँ सुभूतं ।

विश्वस्य भर्तृ विश्वस्य जनयितृ ।

तत् त्वोपदधे कामदुघ–मक्षितं ।

प्रजापतिस्त्वा सादयतु ।

तया देवतया-ऽङ्गिरस्वद्-ध्रुवा सीद ॥ **2 (8)**

**T.B.3.11.1.3**

तेजोऽसि तपसि श्रितं । समुद्रस्य प्रतिष्ठा ।

त्वयीदमन्तः । विश्वं यक्षं विश्वं भूतं विश्व सुभूतं ।

विश्वस्य भर्तृविश्वस्य जनयितृ । तत् त्वोपदधे कामदुघ-मक्षितं ।

प्रजापतिस्त्वा सादयतु । तया देवतया-ऽङ्गिरस्वद्-ध्रुवा सीद ॥ **3 (8)**

**T.B.3.11.1.4**

समुद्रोऽसि तेजसि श्रितः । अपां प्रतिष्ठा । त्वयीदमन्तः ।

विश्वं यक्षं विश्वं भूतं विश्व सुभूतं ।

विश्वस्य भर्ता विश्वस्य जनयिता । तं त्वोपदधे कामदुघ-मक्षितं ।

प्रजापतिस्त्वा सादयतु । तया देवतया-ऽङ्गिरस्वद्-ध्रुवा सीद ॥ **4 (8)**

**T.B.3.11.1.5**

आपः स्थ समुद्रे श्रिताः । पृथिव्याः प्रतिष्ठा युष्मासु ।

इदमन्तः । विश्वं यक्षं विश्वं भूतं विश्व सुभूतं ।

विश्वस्य भर्त्र्यो विश्वस्य जनयित्र्यः ।

ता व उपदधे कामदुघा अक्षिताः । प्रजापतिस्त्वा सादयतु ।
तया देवतया–ऽङ्गिरस्वद्–ध्रुवा सीद ॥ **5 (8)**

**T.B.3.11.1.6**

पृथिव्य–स्यप्सु श्रिता । अग्नेः प्रतिष्ठा । त्वयीदमन्तः ।
विश्वं यक्षं विश्वं भूतं विश्वꣳ सुभूतं ।
विश्वस्य भर्त्री विश्वस्य जनयित्री । तां त्वोपदधे कामदुघा–मक्षितां ।
प्रजापतिस्त्वा सादयतु । तया देवतया–ऽङ्गिरस्वद्–ध्रुवा सीद ॥ **6 (8)**

**T.B.3.11.1.7**

अग्निरसि पृथिव्याꣳ श्रितः । अन्तरिक्षस्य प्रतिष्ठा ।
त्वयीदमन्तः । विश्वं यक्षं विश्वं भूतं विश्वꣳ सुभूतं ।
विश्वस्य भर्ता विश्वस्य जनयिता । तं त्वोपदधे कामदुघ–मक्षितं ।
प्रजापतिस्त्वा सादयतु । तया देवतया–ऽङ्गिरस्वद्–ध्रुवा सीद ॥ **7 (8)**

**T.B.3.11.1.8**

अन्तरिक्ष–मस्यग्नौ श्रितं । वायोः प्रतिष्ठा । त्वयीदमन्तः ।
विश्वं यक्षं विश्वं भूतं विश्वꣳ सुभूतं ।
विश्वस्य भर्तृ विश्वस्य जनयितृ ।

तत् त्वोपदधे कामदुघ–मक्षितं । प्रजापतिस्त्वा सादयतु ।
तया देवतया–ऽङ्गिरस्वद्–ध्रुवा सीद ॥ **8 (8)**

**T.B.3.11.1.9**

वायुरस्यन्तरिक्षे श्रितः । दिवः प्रतिष्ठा । त्वयीदमन्तः ।
विश्वं यक्षं विश्वं भूतं विश्व सुभूतं ।
विश्वस्य भर्ता विश्वस्य जनयिता ।
तं त्वोपदधे कामदुघ–मक्षितं । प्रजापतिस्त्वा सादयतु ।
तया देवतया–ऽङ्गिरस्वद्–ध्रुवा सीद ॥ **9 (8)**

**T.B.3.11.1.10**

द्यौरसि वायौ श्रिता । आदित्यस्य प्रतिष्ठा । त्वयीदमन्तः ।
विश्वं यक्षं विश्वं भूतं विश्व सुभूतं ।
विश्वस्य भर्त्री विश्वस्य जनयित्री ।
तां त्वोपदधे कामदुघा–मक्षितां । प्रजापतिस्त्वा सादयतु ।
तया देवतया–ऽङ्गिरस्वद्–ध्रुवा सीद ॥ **10 (8)**

**T.B.3.11.1.11**

आदित्योऽसि दिवि श्रितः । चन्द्रमसः प्रतिष्ठा । त्वयीदमन्तः ।
विश्वं यक्षं विश्वं भूतं विश्व सुभूतं ।

विश्वस्य भर्ता विश्वस्य जनयिता ।

तं त्वोपदधे कामदुघ-मक्षितं । प्रजापतिस्त्वा सादयतु ।

तया देवतया-ऽङ्गिरस्वद्-ध्रुवा सीद ॥ **11 (8)**

**T.B.3.11.1.12**

चन्द्रमा अस्यादित्ये श्रितः । नक्षत्राणां प्रतिष्ठा । त्वयीदमन्तः ।

विश्वं यक्षं विश्वं भूतं विश्व सुभूतं ।

विश्वस्य भर्ता विश्वस्य जनयिता ।

तं त्वोपदधे कामदुघ-मक्षितं । प्रजापतिस्त्वा सादयतु ।

तया देवतया-ऽङ्गिरस्वद्-ध्रुवा सीद ॥ **12 (8)**

**T.B.3.11.1.13**

नक्षत्राणि स्थ चन्द्रमसि श्रितानि । सम्वथ्सरस्य प्रतिष्ठा युष्मासु ।

इदमन्तः । विश्वं यक्षं विश्वं भूतं विश्व सुभूतं ।

विश्वस्य भर्तॄणि विश्वस्य जनयितॄणि ।

तानि व उपदधे कामदुघा-न्यक्षितानि । प्रजापतिस्त्वा सादयतु ।

तया देवतया-ऽङ्गिरस्वद्-ध्रुवा सीद ॥ **13 (8)**

**T.B.3.11.1.14**

सम्ँवथ्सरोऽसि नक्षत्रेषु श्रितः । ऋतूनां प्रतिष्ठा । त्वयीदमन्तः ।

विश्वं ँयक्षं ँविश्वं भूतं ँविश्व९ँ सुभूतं ।

विश्वस्य भर्ता विश्वस्य जनयिता ।

तं त्वोपदधे कामदुघ-मक्षितं । प्रजापतिस्त्वा सादयतु ।

तया देवतया-ऽङ्गिरस्वद्-ध्रुवा सीद ॥ **14 (8)**

**T.B.3.11.1.15**

ऋतवः स्थ सम्ँवथ्सरे श्रिताः । मासानां प्रतिष्ठा युष्मासु ।

इदमन्तः । विश्वं ँयक्षं ँविश्वं भूतं ँविश्व९ँ सुभूतं ।

विश्वस्य भर्तारो विश्वस्य जनयितारः ।

तान्. व उपदधे कामदुघा-नक्षितान् । प्रजापतिस्त्वा सादयतु ।

तया देवतया-ऽङ्गिरस्वद्-ध्रुवा सीद ॥ **15 (8)**

**T.B.3.11.1.16**

मासाः स्थर्तुषु श्रिताः । अर्द्धमासानां प्रतिष्ठा युष्मासु ।

इदमन्तः । विश्वं ँयक्षं ँविश्वं भूतं ँविश्व९ँ सुभूतं ।

विश्वस्य भर्तारो विश्वस्य जनयितारः ।

तान्. व उपदधे कामदुघा–नक्षितान् । प्रजापतिस्त्वा सादयतु ।
तया देवतया–ऽङ्गिरस्वद्–ध्रुवा सीद ॥ **16 (8)**

**T.B.3.11.1.17**

अर्द्धमासाः स्थ मासु श्रिताः । अहोरात्रयोः प्रतिष्ठा युष्मासु ।
इदमन्तः । विश्वं यक्षं विश्वं भूतं विश्वꣳ सुभूतं ।
विश्वस्य भर्तारो विश्वस्य जनयितारः ।
तान्. व उपदधे कामदुघा–नक्षितान् । प्रजापतिस्त्वा सादयतु ।
तया देवतया–ऽङ्गिरस्वद्–ध्रुवा सीद ॥ **17 (8)**

**T.B.3.11.1.18**

अहोरात्रे स्थोऽर्द्धमासेषु श्रिते । भूतस्य प्रतिष्ठे भव्यस्य प्रतिष्ठे ।
युवयो–रिदमन्तः । विश्वं यक्षं विश्वं भूतं विश्वꣳ सुभूतं ।
विश्वस्य भर्त्र्यौ विश्वस्य जनयित्र्यौ । ते वामुपदधे कामदुघे अक्षिते ।
प्रजापतिस्त्वा सादयतु । तया देवतया–ऽङ्गिरस्वद्–ध्रुवा सीद ॥ **18 (8)**

**T.B.3.11.1.19**

पौर्णमास्यष्टका ऽमावास्या । अन्नादाः स्थान्नदुघो युष्मासु ।
इदमन्तः । विश्वं यक्षं विश्वं भूतं विश्वꣳ सुभूतं ।
विश्वस्य भर्त्र्यो विश्वस्य जनयित्र्यः ।

ता व उपदधे कामदुघा–अक्षिताः । प्रजापतिस्त्वा सादयतु ।
तया देवतया–ऽङ्गिरस्वद्–ध्रुवा सीद ॥ **19 (8)**

**T.B.3.11.1.20**

राडसि बृहती श्रीरसीन्द्रपत्नी धर्मपत्नी । विश्वं भूतमनु प्रभूता ।
त्वयीदमन्तः । विश्वं यँक्षं विँश्वं भूतं विँश्वꣳ सुभूतं ।
विश्वस्य भर्त्री विश्वस्य जनयित्री । तां त्वोपदधे कामदुघा–मक्षितां ।
प्रजापतिस्त्वा सादयतु । तया देवतया–ऽङ्गिरस्वद्–ध्रुवा सीद ॥ **20 (8)**

**T.B.3.11.1.21**

ओजोऽसि सहोऽसि । बलमसि भ्राजोऽसि ।
देवानां धामामृतं । अमर्त्य–स्तपोजाः । त्वयीदमन्तः ।
विश्वं यँक्षं विँश्वं भूतं विँश्वꣳ सुभूतं ।
विश्वस्य भर्ता विश्वस्य जनयिता ।
तं त्वोपदधे कामदुघ–मक्षितं । प्रजापतिस्त्वा सादयतु ।
तया देवतया–ऽङ्गिरस्वद्–ध्रुवा सीद ( ) ॥ **21 (10)**

*लोक – स्तप – स्तेजः – समुद्र – आपः – पृथिव्य – ग्नि – रन्तरिक्षम् – वायुर् – द्यौ – रादित्य – श्चन्द्रमा – नक्षत्राणि – सम्ँवथ्सर – ऋतवो – मासा – अर्द्धमासा – अहोरात्रे – पौर्णमासी – राड – स्योजोऽस्येकवि॒ꣳशतिः (A1)*

**Special Korvai**

लोकोऽसि भर्ता तम् । तपस्तेजोऽसि भर्तृ तत् ।

समुद्रोऽसि भर्ता तम् । आपः स्थ भर्त्र्यस्ता वः ।

पृथिवी भर्त्री ताम् ।

अग्निरसि भर्ता तम् । अन्तरिक्षं भर्तृ तत् । वायुरसि भर्ता तम् ।

द्यौरसि भर्त्री ताम् ।

आदित्यश्चन्द्रमा भर्ता तम् । नक्षत्राणि स्थ भर्तृणि तानि वः ।

सम्ँवथ्सरोऽसि भर्ता तम् ।

ऋतवो मासा अर्द्धमासा भर्तारस्तान्. वः ।

अहोरात्रे भर्त्र्यौ ते वाम् । पौर्णमासी भर्त्र्यस्ता वः ।

राडसि भर्त्री ताम् । ओजोऽसि भर्ता तमेकवि॒ꣳशतिः ।

## 3.11.2 अनुवाकं 2 –चतुर्भिरनुवाकैः चतस्र आहुतीर्जुहोति

**T.B.3.11.2.1**

त्वमग्ने रुद्रो असुरो महो दिवः । त्वꣳ शर्द्धो मारुतं पृक्ष ईशिषे ।

त्वं ँवातैररुणैर्यासि शंगयः । त्वं पूषा विधतः पासि नु त्मना ।

देवा देवेषु श्रयद्ध्वं । प्रथमा द्वितीयेषु श्रयद्ध्वं ।

द्वितीया–स्तृतीयेषु श्रयद्ध्वं । तृतीया–श्चतुर्थेषु श्रयद्ध्वं ।

चतुर्थाः पञ्चमेषु श्रयद्ध्वं । पञ्चमाः षष्ठेषु श्रयद्ध्वं । **22 (10)**

**T.B.3.11.2.2**

षष्ठाः सप्तमेषु श्रयद्ध्वं । सप्तमा अष्टमेषु श्रयद्ध्वं ।

अष्टमा नवमेषु श्रयद्ध्वं । नवमा दशमेषु श्रयद्ध्वं ।

दशमा एकादशेषु श्रयद्ध्वं । एकदशा द्वादशेषु श्रयद्ध्वं ।

द्वादशा–स्त्रयोदशेषु श्रयद्ध्वं ।

त्रयोदशा–श्चतुर्दशेषु श्रयद्ध्वं । चतुर्दशाः पञ्चदशेषु श्रयद्ध्वं ।

पञ्चदशाः षोडशेषु श्रयद्ध्वं । **23 (10)**

**T.B.3.11.2.3**

षोडशाः सप्तदशेषु श्रयद्ध्वं । सप्तदशा अष्टादशेषु श्रयद्ध्वं ।

अष्टादशा एकान्नविꣳशेषु श्रयद्ध्वं ।

एकान्नवि॒ꣳ॒शा वि॒ꣳ॒शेषु॒ श्रयद्ध्वं ।
वि॒ꣳ॒शा एकवि॒ꣳ॒शेषु॒ श्रयद्ध्वं ।
ए॒क॒वि॒ꣳ॒शा द्वावि॒ꣳ॒शेषु॒ श्रयद्ध्वं ।
द्वा॒वि॒ꣳ॒शा स्त्रयोवि॒ꣳ॒शेषु॒ श्रयद्ध्वं ।
त्र॒यो॒वि॒ꣳ॒शा श्चतुर्वि॒ꣳ॒शेषु॒ श्रयद्ध्वं ।
च॒तु॒र्वि॒ꣳ॒शाः पञ्चवि॒ꣳ॒शेषु॒ श्रयद्ध्वं ।
प॒ञ्च॒वि॒ꣳ॒शाः षड्वि॒ꣳ॒शेषु॒ श्रयद्ध्वं । **24 (10)**

**T.B.3.11.2.4**

ष॒ड्वि॒ꣳ॒शाः सप्तवि॒ꣳ॒शेषु॒ श्रयद्ध्वं ।
स॒प्त॒वि॒ꣳ॒शा अष्टावि॒ꣳ॒शेषु॒ श्रयद्ध्वं ।
अ॒ष्टा॒वि॒ꣳ॒शा एकान्नत्रि॒ꣳ॒शेषु॒ श्रयद्ध्वं ।
ए॒का॒न्न॒त्रि॒ꣳ॒शा स्त्रि॒ꣳ॒शेषु॒ श्रयद्ध्वं ।
त्रि॒ꣳ॒शा एकत्रि॒ꣳ॒शेषु॒ श्रयद्ध्वं ।
ए॒क॒त्रि॒ꣳ॒शा द्वात्रि॒ꣳ॒शेषु॒ श्रयद्ध्वं ।
द्वा॒त्रि॒ꣳ॒शा स्त्रयस्त्रि॒ꣳ॒शेषु॒ श्रयद्ध्वं ।
देवास्त्रिरे–कादशा॒ स्त्रिस्त्रयस्त्रिꣳशाः ।

उत्तरे भवत । उत्तर वर्त्मान उत्तर सत्वानः ( ) ।

यत्काम इदं जुहोमि । तन्मे समृद्ध्यतां ।

वय७ स्याम पतयो रयीणां । भूर्भुवस्वः स्वाहा ॥ **25 (14)**

*(षष्ठेषु श्रयद्धव७ – षोडशेषु श्रयद्धव७ – षड्विं७शेषु श्रयद्ध्व – मुत्तरसत्वानश्चत्वारि च) (A2)*

**3.11.3** अनुवाकं 3 –चतुर्भिरनुवाकैः चतस्र आहुतीर्जुहोति

**T.B.3.11.3.1**

अग्नाविष्णू सजोषसा । इमा वर्द्धन्तु वाङ्गिरः ।

द्युम्नै र्वाजेभि–रागतं । राज्ञी विराज्ञी । सम्राज्ञी स्वराज्ञी ।

अर्चिः शोचिः । तपो हरो भाः । अग्निः सोमो बृहस्पतिः ।

विश्वे देवा भुवनस्य गोपाः । ते सर्वे सङ्गत्य ( ) ।

इदं मे प्रावता वचः । वय७ स्याम पतयो रयीणां ।

भूर्–भुवस्–स्वस् स्वाहा ॥ **26 (13)**

*(सङ्गत्य त्रीणि च) (A3)*

## 3.11.4 अनुवाकं 4 –चतुर्भिरनुवाकैः चतस्र आहुतीर्जुहोति

**T.B.3.11.4.1**

अन्नपते ऽन्नस्य नो देहि । अनमीवस्य शुष्मिणः ।

प्रप्रदातारन्तारिषः । ऊर्जं नो धेहि द्विपदे चतुष्पदे ।

अग्ने पृथिवीपते । सोम वीरुधां पते । त्वष्टः समिधां पते ।

विष्णवाशानां पते । मित्र सत्यानां पते । वरुण धर्मणां पते । **27 (10)**

**T.B.3.11.4.2**

मरुतो गणानां पतयः । रुद्र पशूनां पते । इन्द्रौजसां पते ।

बृहस्पते ब्रह्मणस्पते । आ रुचा रोचेऽह७ स्वयं ।

रुचा रुरुचे-रोचमानः । अतीत्यादः स्वराभरेह ।

तस्मिन्. योनौ प्रजनौ प्रजायेय । वय७ स्याम पतयो रयीणां ।

भूर्भुवः स्वः स्वाहा ( ) ॥ **28 (10)**

*[वरुण धर्मणां पते स्वः – स्वाहा ( ) ] (A4)*

## 3.11.5 अनुवाकं 5 –चतुर्भिरनुवाकैः चतस्र आहुतीर्जुहोति

**T.B.3.11.5.1**

सप्त ते अग्ने समिधः सप्त जिह्वाः ।

सप्तर्.षयः सप्तधाम प्रियाणि । सप्त होत्रा अनु विद्वान् ।

सप्त योनी–रापृणस्वा घृतेन । प्राची दिक् । अग्नि र्देवता ।
अग्निꣳ स दिशां देवं देवताना–मृच्छतु । यो मैतस्यै
दिशो ऽभिदासति । दक्षिणा दिक् । इन्द्रो देवता । **29 (10)**

**T.B.3.11.5.2**

इन्द्रꣳ स दिशां देवं देवताना–मृच्छतु ।
यो मैतस्यै दिशो ऽभिदासति । प्रतीची दिक् । सोमो देवता ।
सोमꣳ स दिशां देवं देवताना–मृच्छतु ।
यो मैतस्यै दिशो ऽभिदासति । उदीची दिक् । मित्रावरुणौ देवता ।
मित्रावरुणौ स दिशां देवौ देवताना–मृच्छतु ।
यो मैतस्यै दिशो ऽभिदासति । **30 (10)**

**T.B.3.11.5.3**

ऊर्द्ध्वा दिक् । बृहस्पति र्देवता ।
बृहस्पतिꣳ स दिशां देवं देवताना–मृच्छतु ।
यो मैतस्यै दिशो ऽभिदासति । इयन्दिक् । अदिति र्देवता ।
अदितिꣳ स दिशां देवीं देवताना–मृच्छतु ।

यो मैतस्यै दिशो ऽभिदासति ।

पुरुषो दिक् । पुरुषो मे कामान् थ्समर्द्धयतु ( ) । **31 (10)**

**T.B.3.11.5.4**

अन्धो जागृविः प्राण । असावेहि । बधिर आक्रन्दयित–रपान ।

असावेहि । उषस–मुषस–मशीय । अहमसो ज्योतिरशीय ।

अहमसो ऽपोशीय । वय७ स्याम पतयो रयीणां ।

भूर्भुवः स्वः स्वाहा ॥ **32 (9)**

*(दक्षिणा दिगिन्द्रो देवता – मित्रावरुणौ स दिशां देवौ देवतानामृच्छतु*

*यो मैतस्यै दिशोऽभिदा – सत्यर्द्धयतु – +नव च) (A5)*

**3.11.6** अनुवाकं 6 –उपस्थानम्

**T.B.3.11.6.1**

यत्तेऽचितं ँयदु चितन्ते अग्ने । यत्त ऊनं ँयदु तेऽतिरिक्तं ।

आदित्यास्त–दङ्गिरस–श्चिन्वन्तु । विश्वे ते देवाश्चिति–मापूरयन्तु ।

चितश्चासि सञ्चितश्चा–स्यग्ने । एतावा७श्चासि भूया७श्चास्यग्ने ॥

लोकं पृण च्छिद्रं पृण । अथो सीद शिवा त्वं ।

इन्द्राग्नी त्वा बृहस्पतिः । अस्मिन्. योनावसीषदन्न् । **33 (10)**

**T.B.3.11.6.2**

तया देवतया-ऽङ्गिरस्वद्-ध्रुवा सीद ॥ ता अस्य सूददोहसः ।

सोम॑ श्रीणन्ति पृश्नयः । जन्मं देवानां विशः ।

त्रिष्वा रोचने दिवः । तया देवतया-ऽङ्गिरस्वद्-ध्रुवा सीद ॥

अग्ने देवा॒ इहावह । जज्ञानो वृक्त बर्.हिषे ।

असि होता न ईड्यः ॥ अगन्म महा मनसा यविष्ठं । **34 (10)**

**T.B.3.11.6.3**

यो दीदाय समिद्धः स्वे दुरोणे । चित्रभानू रोदसी अन्तरुर्वी ।

स्वाहुतं विश्वतः प्रत्यञ्चं ॥ मेधाकारं विदथस्य प्रसाधनं ।

अग्नि॒ होतारं परिभूतमं मतिं । त्वामर्भस्य हविषः समानमित् ।

त्वां महो वृणते नरो नान्यं-त्वत् ॥ मनुष्वत्त्वा निधीमहि ।

मनुष्वथ् समिधीमहि । अग्ने मनुष्व-दङ्गिरः । **35 (10)**

**T.B.3.11.6.4**

देवान् देवायते यज ॥ अग्निर्. हि वाजिनं विशे ।

ददाति विश्वचर्.षणिः ।

अग्नी राये स्वाभुवं । स प्रीतो याति वार्यं । इष॑ स्तोतृभ्य आभर ॥

पृष्टो दिवि पृष्टो अग्निः पृथिव्यां । पृष्टो विश्वा ओषधी-राविवेश ।

वैश्वानरः सहसा पृष्टो अग्निः ।

स नो दिवा स रिषः पातु नक्तं ( ) ॥ **36 (10)**

*[असीषदन्. – यविष्ठ – मङ्गिरो – नक्तं ( ) ] (A6)*

**3.11.7** अनुवाकं 7 –नाचिकेतब्राह्मणं तत्र आग्निदेवतोपासनम्

**T.B.3.11.7.1**

अयं ँवाव यः पवते । सोऽग्नि र्नाचिकेतः । स यत् प्राङ् पवते ।

तदस्य शिरः । अथ यद् दक्षिणा । स दक्षिणः पक्षः ।

अथ यत् प्रत्यक् । तत् पुच्छं । य दुदङ्ङ् । स उत्तरः पक्षः । **37 (10)**

**T.B.3.11.7.2**

अथ यथ् सम्ँवाति । तदस्य समञ्चनं च प्रसारणं च ।

अथो संपदेवास्य सा ॥ स७ ह वा अस्मै स कामः पद्यते ।

यत् कामो यजते । योऽग्निं नाचिकेतं चिनुते ।

य उ चैन–मेवं ँवेद ॥ यो ह वा अग्ने र्नाचिकेतस्यायतनं

प्रतिष्ठां ँवेद । आयतनवान् भवति । गच्छति प्रतिष्ठां । **38 (10)**

**T.B.3.11.7.3**

हिरण्यं ँवा अग्ने र्नाचिकेतस्यायतनं प्रतिष्ठा । य एवं ँवेद ।

आयतनवान् भवति । गच्छति प्रतिष्ठां ॥

यो ह वा अग्ने नाचिकेतस्य शरीरं ँवेद ।

स शरीर एव स्वर्गं ँलोकमेति ।

हिरण्यं ँवा अग्ने नाचिकेतस्य शरीरं ।

य एवं ँवेद । स शरीर एव स्वर्गं ँलोकमेति ॥

अथो यथा रुक्म उत्–तप्तो भाय्यात् । **39 (10)**

**T.B.3.11.7.4**

एवमेव स तेजसा यशसा । अस्मिꣳश्च लोके–ऽमुष्मिꣳश्च भाति ॥

उरवो ह वै नामैते लोकाः । ये–ऽवरेणादित्यं ।

अथ हैते वरीयाꣳसो लोकाः । ये परेणादित्यं ।

अन्तवन्तꣳ ह वा एष क्षय्यं ँलोकं जयति । यो–ऽवरेणादित्यं ।

अथ हैषो–ऽनन्त–मपार–मक्षय्यं ँलोकं जयति ।

यः परेणादित्यं ( ) ॥ **40 (10)**

**T.B.3.11.7.5**

अनन्तꣳ ह वा अपार–मक्षय्यं ँलोकं जयति ।

योऽग्निं नाचिकेतं चिनुते । य उ चैन–मेवं ँवेद ॥

अथो यथा रथे तिष्ठन् पक्षसी पर्या–वर्त्तमाने प्रत्यपेक्षते ।

एव-महोरात्रे प्रत्यपेक्षते ।

नास्या-होरात्रे लोकमाप्नुतः । योऽग्निं नाचिकेतं चिनुते ।

य उ चैन-मेवं वेद ॥ 41 (8) *(उत्तरः पक्षो – गच्छति प्रतिष्ठां – भाय्याद् – यः परेणादित्य – +मष्टौ च) (A7)*

**3.11.8** अनुवाकं 8 –नाचिकेतोपाख्यानम्

**T.B.3.11.8.1**

उशन्. ह वै वाजश्रवसः सर्ववेदसं ददौ ।

तस्य ह नचिकेता नाम पुत्र आस । तꣳ ह कुमारꣳ सन्तं ।

दक्षिणासु नीयमानासु श्रद्धा ऽऽविवेश । स होवाच ।

तत कस्मै मां दास्यसीति । द्वितीयं तृतीयं ॥ तꣳ ह परीत उवाच ।

मृत्यवे त्वा ददामीति ॥ तꣳ ह स्मोत्थितं वागभिवदति । **42 (10)**

**T.B.3.11.8.2**

गौतम कुमारमिति । स होवाच । परेहि मृत्यो गृहान् ।

मृत्यवे वै त्वाऽदा-मिति ॥ तं वै प्रवसन्तं गन्तासीति होवाच ।

तस्य स्म तिस्रो रात्री-रनाश्वान् गृहे वसतात् । स यदि त्वा पृच्छेत् ।

कुमार कति रात्री-रवात्सी-रिति । तिस्र इति प्रति ब्रूतात् ।

किं प्रथमाꣳ रात्रि-माश्ना इति । **43 (10)**

**T.B.3.11.8.3**

प्रजां त इति । किं द्वितीया-मिति । पशूꣳस्त इति ।

किं तृतीया-मिति । साधुकृत्यां त इति ॥ तं ँवै प्रवसन्तं जगाम ।

तस्य ह तिस्रो रात्री-रनाश्वान् गृह उवास । तमागत्य पप्रच्छ ।

कुमार कति रात्री-रवात्सी-रिति । तिस्र इति प्रत्युवाच । **44 (10)**

**T.B.3.11.8.4**

किं प्रथमाꣳ रात्रि-माश्ना इति । प्रजां त इति ।

किं द्वितीया-मिति । पशूꣳस्त इति । किं तृतीया-मिति ।

साधुकृत्यां त इति ॥ नमस्ते अस्तु भगव इति होवाच ।

वरं ँवृणीष्वेति ॥ पितरमेव जीवन्नयानीति ॥

द्वितीयं ँवृणीष्वेति । **45 (10)**

**T.B.3.11.8.5**

इष्टापूर्तयो र्मे ऽक्षितिं ब्रूहीति होवाच ।

तस्मै हैतमग्निं नाचिकेत-मुवाच ।

ततो वै तस्ये-ष्टापूर्ते ना क्षीयेते ॥

नास्येष्टा-पूर्ते क्षीयेते । योऽग्निं नाचिकेतं चिनुते ।

य उ चैन-मेवं वेद ॥ तृतीयं वृणीष्वेति ।

पुन र्मृत्यो र्मे ऽपजितिं ब्रूहीति होवाच ।

तस्मै हैतमग्निं नाचिकेत-मुवाच ।

ततो वै सोऽप पुन र्मृत्यु-मजयत् । **46 (10)**

**T.B.3.11.8.6**

अप पुन र्मृत्युं जयति । योऽग्निं नाचिकेतं चिनुते ॥

य उ चैन-मेवं वेद ॥ प्रजापति र्वै प्रजाकाम-स्तपो-ऽतप्यत ।

स हिरण्य-मुदास्यत् । त-दग्नौ प्रास्यत् । त-दस्मै नाच्छदयत् ।

तद् द्वितीयं प्रास्यत् । त-दस्मै नै वाच्छदयत् ।

तत् तृतीयं प्रास्यत् । **47 (10)**

**T.B.3.11.8.7**

त-दस्मै नै वाच्छदयत् । त-दात्म-न्नेव हृदय्येऽग्नौ वैश्वानरे प्रास्यत् ।

त-दस्मा अच्छदयत् । तस्माद्धिरण्यं कनिष्ठं धनानां ।

भुञ्जत् प्रियतमं । हृदयजꣳ हि । स वै तमेव नाविन्दत् ।

यस्मै तां दक्षिणा-मनेष्यत् ।

ता७ स्वायैव हस्ताय दक्षिणायानयत् ।

तां प्रत्यगृह्णात् । **48 (10)**

**T.B.3.11.8.8**

दक्षाय त्वा दक्षिणां प्रतिगृह्णामीति । सो ऽदक्षत दक्षिणां प्रतिगृह्य ।

दक्षते ह वै दक्षिणां प्रतिगृह्य । य एवं ँवेद ॥

एतद्ध स्म वै तद् विद्वा७्सो वाजश्रवसा गोतमाः ।

अप्यनूदेश्यां दक्षिणां प्रतिगृह्णन्ति ।

उभयेन वयं दक्षिष्यामह एव दक्षिणां प्रतिगृह्येति ।

ते ऽदक्षन्त दक्षिणां प्रतिगृह्य ।

दक्षते ह वै दक्षिणां प्रतिगृह्य । य एवं ँवेद ( ) ।

प्र हान्यं ँल्लीनाति ॥ **49 (11)**

*(वद – त्याश्ना इत् – युवाच – द्वितीयं ँवृणीष्वे – त्यजयत् –
तृतीयं प्रास्य – दगृह्णाद् – य एवं ँवेदैकं च) (A8)*

3.11.9 अनुवाकं 9 –चयनप्रयोगः

**T.B.3.11.9.1**

तꣳ हैत-मेके पशुबन्ध एवोत्तरवेद्यां चिन्वते ।

उत्तरवेदिसम्मित एषोऽग्निरिति वदन्तः ।

तन्न तथा कुर्यात् । एत-मग्निं कामेन व्यर्द्धयेत् ।

स एनं कामेन व्यृद्धः । कामेन व्यर्द्धयेत् ।

सौम्ये वावै नमध्वरे चिन्वीत । यत्र वा भूयिष्ठा आहुतयो हूयेरन्न् ।

एत-मग्निं कामेन समर्द्धयति । स एनं कामेन समृद्धः । **50 (10)**

**T.B.3.11.9.2**

कामेन समर्द्धयति ॥ अथ हैनं पुरर्.षयः ।

उत्तरवेद्या-मेव सत्रिय-मचिन्वत । ततो वै तेऽविन्दन्त प्रजां ।

अभि स्वर्गं ँल्लोक-मजयन्न् । विन्दत एव प्रजां ।

अभि स्वर्गं ँल्लोकं जयति । योऽग्निं नाचिकेतं चिनुते ।

य उ चैन-मेवं ँवेद ॥ अथ हैनं ँवायुर्. ऋद्धिकामः । **51 (10)**

**T.B.3.11.9.3**

यथान्युप्त-मेवोपदधे । ततो वै स एता-मृद्धि-मार्द्ध्नोत् ।

यामिदं ँवायुर्. ऋद्धः । एता-मृद्धि-मृद्ध्नोति ।

यामिदं ँवायुर्. ऋद्धः । योऽग्निं नाचिकेतं चिनुते ।
य उ चैन–मेवं ँवेद ॥ अथ हैनं गोबलो वार्ष्णः पशुकामः ।
पांक्तमेव चिक्ये । पञ्च पुरस्तात् । **52 (10)**

**T.B.3.11.9.4**

पञ्च दक्षिणतः । पञ्च पश्चात् । पञ्चोत्तरतः । एकां मद्ध्ये ।
ततो वै स सहस्रं पशून् प्राप्नोत् । प्र सहस्रं पशू–नाप्नोति ।
योऽग्निं नाचिकेतं चिनुते । य उ चैन–मेवं ँवेद ॥
अथ हैनं प्रजापति ज्यैष्ठ्यकामो यशस्कामः प्रजननकामः ।
त्रिवृतमेव चिक्ये । **53 (10)**

**T.B.3.11.9.5**

सप्त पुरस्तात् । तिस्रो दक्षिणतः । सप्त पश्चात् । तिस्र उत्तरतः ।
एकां मद्ध्ये । ततो वै स प्र यशो ज्यैष्ठ्य–माप्नोत् ।
एतां प्रजातिं प्राजायत । यामिदं प्रजाः प्रजायन्ते ।
त्रिवृद् वै ज्यैष्ठ्यं । माता पिता पुत्रः । **54 (10)**

**T.B.3.11.9.6**

त्रिवृत् प्रजननं । उपस्थो योनि र्मद्ध्यमा ।
प्रयशो ज्यैष्ठ्य–माप्नोति । एतां प्रजातिं प्रजायते ।

यामिदं प्रजाः प्रजायन्ते । योऽग्निं नाचिकेतं चिनुते ।
य उ चैनमेवं ँवेद ॥ अथ हैन-मिन्द्रो ज्यैष्ठ्यकामः ।
ऊर्द्ध्वा एवोपदधे । ततो वै स ज्यैष्ठ्य-मगच्छत् । **55 (10)**

**T.B.3.11.9.7**

ज्यैष्ठ्यं गच्छति । योऽग्निं नाचिकेतं चिनुते ।
य उ चैन-मेवं ँवेद ॥ अथ हैन-मसावादित्यः स्वर्गकामः ।
प्राचीरेवोपदधे । ततो वै सोऽभि स्वर्गं ँलोक-मजयत् ।
अभि स्वर्गं ँलोकं जयति । योऽग्निं नाचिकेतं चिनुते ।
य उ चैन-मेवं ँवेद ॥ स यदीच्छेत् । **56 (10)**

**T.B.3.11.9.8**

तेजस्वी यशस्वी ब्रह्मवर्चसी स्यामिति ।
प्राङ होतुर्द्धिष्ण्या-दुथ्सर्पेत् । येयं प्रागाद् यशस्वती ।
सा मा प्रोर्णोतु । तेजसा यशसा ब्रह्मवर्चसेनेति ।
तेजस्व्येव यशस्वी ब्रह्मवर्चसी भवति ॥ अथ यदीच्छेत् ।
भूयिष्ठं मे श्रद्दधीरन् । भूयिष्ठा दक्षिणा नयेयुरिति ।

दक्षिणासु नीयमानासु प्राच्येहि प्राच्येहीति प्राची जुषाणा वेत्वाज्यस्य स्वाहेति स्रुवेणो–पहत्या हवनीये जुहुयात् । **57 (10)**

**T.B.3.11.9.9**

भूयिष्ठ–मेवास्मै श्रद्दधते । भूयिष्ठा दक्षिणा नयन्ति ॥

पुरीष–मुपधाय । चिति–क्लृप्तिभि–रभिमृश्य ।

अग्निं प्रणीयोपसमाधाय । चतस्र एता आहुती र्जुहोति ।

त्वमग्ने रुद्र इति शतरुद्रीयस्य रूपं ।

अग्ना–विष्णू इति वसोर्द्धारायाः । अन्नपत इत्यन्न होमः ।

सप्त ते अग्ने समिधः सप्त जिह्वा इति विश्वप्रीः ( ) ॥ **58 (10)**

*[समृद्ध – ऋद्धिकामः – पुरस्ताच् – चिक्ये – पुत्रो – ऽगच्छ – दिच्छे – ज्जुहुयाद् – विश्वप्रिः ( ) ] (A9)*

**Special Korvai**

(पुरर्.षयो वायुर् गोबलः सहस्रं प्रजापति स्त्रिवृदिन्द्रो ऽसावादित्यः स यदीच्छेत् )

**3.11.10**अनुवाकं 10 –तत्प्रशंसा

**T.B.3.11.10.1**

यां प्रथमा-मिष्टका-मुपदधाति । इमं तया लोक-मभि जयति ।

अथो या अस्मिन् ँलोके देवताः ।

तासा॒ं सायुज्य॒ं सलोकता-माप्नोति । यां द्वितीया-मुपदधाति ।

अन्तरिक्षलोकं तया-ऽभि जयति । अथो या अन्तरिक्ष लोके देवताः ।

तासा॒ं सायुज्य॒ं सलोकता-माप्नोति ।

यां तृतीया-मुपदधाति ।

अमुं तया लोक-मभिजयति । **59 (10)**

**T.B.3.11.10.2**

अथो या अमुष्मिन् ँलोके देवताः ।

तासा॒ं सायुज्य॒ं सलोकता-माप्नोति ।

अथो या अमूरितरा अष्टादश ।

य एवामी उरवश्च वरीया॒ंसश्च लोकाः ।

तानेव ताभि-रभिजयति ॥

कामचारो ह वा अस्योरुषु च वरीयस्सु च लोकेषु भवति ।

योऽग्निं नाचिकेतं चिनुते । य उ चैन-मेवं वेद ॥

सम्वथ्सरो वा अग्नि र्नाचिकेतः । तस्य वसन्तः शिरः । **60 (10)**

**T.B.3.11.10.3**

ग्रीष्मो दक्षिणः पक्षः । वर्.षा उत्तरः । शरत् पुच्छं ।

मासाः कर्मकाराः । अहोरात्रे शतरुद्रीयं । पर्जन्यो वसोर्द्धारा ।

यथा वै पर्जन्यः सुवृष्टं वृष्ट्वा ।

प्रजाभ्यः सर्वान् कामान्थ् संपूरयति ।

एव-मेव स तस्य सर्वान् कामान्थ् संपूरयति ।

योऽग्निं नाचिकेतं चिनुते । **61 (10)**

**T.B.3.11.10.4**

य उ चैन-मेवं वेद ॥ सम्वथ्सरो वा अग्नि र्नाचिकेतः ।

तस्य वसन्तः शिरः । ग्रीष्मो दक्षिणः पक्षः ।

वर्.षाः पुच्छं । शरदुत्तरः पक्षः । हेमन्तो मद्ध्यं ।

पूर्वपक्षाश्चितयः । अपरपक्षाः पुरीषं । अहोरात्राणीष्टकाः ( ) ।

एष वाव सोऽग्नि-रग्निमयः पुनर्णवः ।

अग्निमयो ह वै पुनर्णवो भूत्वा । स्वर्गं लोक-मेति ।

आदित्यस्य सायुज्यं । योऽग्निं नाचिकेतं चिनुते ।
य उ चैन-मेवं वेद ॥ **62 (16)** *(अमुं तया लोकमभिजयति – शिर – श्चिनुत – इष्टकाः षट्च) (A10)*

**Prapaataka Korvai with starting Padams of 1 to 10 Anuvaakams :-**

(लोक – स्त्वमग्ने – ऽग्नाविष्णू – अन्नपते – सप्त ते अग्ने – यत्ते ऽचितम – यं वा – वोशन्. ह वै – तं ह हैतं – यां प्रथमामिष्टकां दश)

**Korvai with starting Padams of 1, 11, 21 Series of Dasinis :-**

(लोक – आदित्य – ओजो – ऽस्यूर्द्ध्वा दिग – नन्तं ह वै – कामेन – ग्रीष्मो द्विषष्टिः)

**First and Last Padam 2nd Prapaatakam of Kaatakam:-**

(लोको – वेद)

॥ हरिः ओं ॥

॥ तैत्तरीय यजुर्ब्राह्मणे काठके द्वितीयः प्रश्नः समाप्तः ॥

=====================================

## 3.11 For Kaatakam - 2 (TB 3.11)

| | Dasini | Vaakyams |
|---|---|---|
| Anuvakam 1 | 21 | 172 |
| Anuvakam 2 | 4 | 44 |
| Anuvakam 3 | 1 | 13 |
| Anuvakam 4 | 2 | 39 |
| Anuvakam 5 | 4 | 20 |
| Anuvakam 6 | 4 | 40 |
| Anuvakam 7 | 5 | 48 |
| Anuvakam 8 | 8 | 81 |
| Anuvakam 9 | 9 | 90 |
| Anuvakam 10 | 4 | 46 |
| Total → | 62 | 593 |

ओं नमः परमात्मने, श्री महागणपतये नमः

श्री गुरुभ्यो नमः, हरिः ओं

# 3. कृष्ण यजुर्वेदीय तैत्तिरीय ब्राह्मणे तृतीयाष्टकं

## 3.12 तैत्तरीय यजुर्ब्राह्मणे काठके तृतीयः प्रश्नः

### चातुर्होत्रचयनं वैश्वसृजचयनं च

### 3.12.1 अनुवाकं 1 –वैश्वसृजचयनाङ्गभूताः दिवश्श्येनय इष्टयः

**T.B.3.12.1.1**

“तुभ्यन्ता अङ्गिरस्तमा{**21**}“ “श्याम तङ्कामममग्ने {**22**}” ।

“आशानां त्वा{**23**}” “विश्वा आशाः{**24**}” ।

“अनु नोऽद्यानुमति{**25**}” “रन्विदनुमते त्वं{**26**}” ।

“कामो भूतस्य{**27**}” “कामस्तदग्रे{**28**}” ।

“ब्रह्म जज्ञानं{**29**}” “पिता विराजां{**30**}” ।

“यज्ञो रायो{**31**}” “ऽयं यँज्ञः{**32**}” । “आपो भद्रा{**33**}”

“आदित्पश्यामि{**34**}” । “तुभ्यं भरन्ति{**35**]” “यो देह्यः{**36**}” ।

“पूर्वं देवा अपरेण{**37**}” “प्राणापानौ{**38**}” ।

“हव्यवाह७{**39**}” “स्विष्टं{**40**}” ॥ **1 (10)** *तुभ्यं दश (A1)*

**3.12.2** अनुवाकं 2 –तासां ब्राह्मणम्

**T.B.3.12.2.1**

देवेभ्यो वै स्वर्गो लोकस्तिरोऽभवत् । ते प्रजापति–मब्रुवन्न् ।

प्रजापते स्वर्गो वै नो लोकस्तिरोऽभूत् । तमन्विच्छेति ।

तं ँयज्ञक्रतुभि–रन्वैच्छत् । तं ँयज्ञक्रतुभि–र्नान्वविन्दत् ।

तमिष्टिभि–रन्वैच्छत् । तमिष्टिभि–रन्वविन्दत् ।

तदिष्टीना–मिष्टित्वं । एष्टयो हवै नाम ।

ता इष्टय इत्याचक्षते परोक्षेण । परोक्ष प्रिया इव हि देवाः ॥ **2 (12)**

**T.B.3.12.2.2**

तमाशा–ऽब्रवीत् । प्रजापत आशया वै श्राम्यसि ।

अहमु वा आशाऽस्मि । मां नु यजस्व ।

अथ ते सत्याऽऽशा भविष्यति । अनु स्वर्गं ँलोकं ँवेथ्स्यसीति ।

स एतमग्नये कामाय पुरोडाश–मष्टाकपालं निरवपत् ।

आशायै चरुं । अनुमत्यै चरुं । ततो वै तस्य सत्या–ऽऽशा ऽभवत् ।

अनु स्वर्गं ँलोक–मविन्दत् । सत्या ह वा अस्याशा भवति ।

अनु स्वर्गं ँलोकं ँविन्दति । य एतेन हविषा यजते ।

य उ चैनदेवं ँवेद ॥ सोऽत्र जुहोति ।
अग्नये कामाय स्वाहा–ऽऽशायै स्वाहा ।
अनुमत्यै स्वाहा प्रजापतये स्वाहा ।
स्वर्गाय लोकाय स्वाहाऽग्नये स्विष्टकृते स्वाहेति ॥ **3 (19)**

**T.B.3.12.2.3**

तं कामोऽब्रवीत् । प्रजापते कामेन वै श्राम्यसि ।
अहमुवै कामोऽस्मि । मां नु यजस्व ।
अथ ते सत्यः कामो भविष्यति । अनु स्वर्गं ँलोकं ँवेथ्स्यसीति ।
स एतमग्नये कामाय पुरोडाश–मष्टाकपालं निरवपत् । कामाय चरुं ।
अनुमत्यै चरुं । ततो वै तस्य सत्यः कामोऽभवत् ।
अनु स्वर्गं ँलोकमविन्दत् । सत्यो ह वा अस्य कामो भवति ।
अनु स्वर्गं ँलोकं ँविन्दति । य एतेन हविषा यजते ।
य उ चैनदेवं ँवेद । सोऽत्र जुहोति ।
अग्नये कामाय स्वाहा कामाय स्वाहा ।
अनुमत्यै स्वाहा प्रजापतये स्वाहा ।
स्वर्गाय लोकाय स्वाहाऽग्नये स्विष्टकृते स्वाहेति ॥ **4 (19)**

**T.B.3.12.2.4**

तं ब्रह्माऽब्रवीत् । प्रजापते ब्रह्मणा वैश्राम्यसि । अहमु वै ब्रह्माऽस्मि ।

मां नु यजस्व । अथ ते ब्रह्मण्वान्. यज्ञो भविष्यति ।

अनु स्वर्गं ँलोकं ँवेथ्स्यसीति ।

स एतमग्नये कामाय पुरोडाश–मष्टाकपालं निरवपत् ।

ब्रह्मणे चरुं । अनुमत्यै चरुं । ततो वै तस्य ब्रह्मण्वान्. यज्ञोऽभवत् ।

अनु स्वर्गं ँलोकमविन्दत् । ब्रह्मण्वान्. ह वा अस्य यज्ञो भवति ।

अनु स्वर्गं ँलोकं ँविन्दति । य एतेन हविषा यजते ।

य उचैनदेवं ँवेद । सोऽत्र जुहोति ।

अग्नये कामाय स्वाहा ब्रह्मणे स्वाहा ।

अनुमत्यै स्वाहा प्रजापतये स्वाहा ।

स्वर्गाय लोकाय स्वाहा ऽग्नये स्विष्टकृते स्वाहेति ॥ **5 (19)**

**T.B.3.12.2.5**

तं ँयज्ञोऽब्रवीत् । प्रजापते यज्ञेन वै श्राम्यसि । अहमु वै यज्ञोऽस्मि ।

मां नु यजस्व । अथ ते सत्यो यज्ञो भविष्यति ।

अनु स्वर्गं ँलोकं ँवेथ्स्यसीति ।

स एतमग्नये कामाय पुरोडाश-मष्टाकपालं निरवपत् ।
यज्ञाय चरुं । अनुमत्यै चरुं । ततो वै तस्य सत्यो यज्ञोऽभवत् ।
अनु स्वर्गं ँ लोकमविन्दत् । सत्यो ह वा अस्य यज्ञो भवति ।
अनु स्वर्गं ँ लोकं ँ विन्दति । य एतेन हविषा यजते ।
य उचैनदेवं ँ वेद । सोऽत्र जुहोति ।
अग्नये कामाय स्वाहा यज्ञाय स्वाहा ।
अनुमत्यै स्वाहा प्रजापतये स्वाहा ।
स्वर्गाय लोकाय स्वाहाऽग्नये स्विष्टकृते स्वाहेति ॥ **6 (19)**

**T.B.3.12.2.6**

तमापो-ऽब्रुवन्न् । प्रजापतेऽप्सु वै सर्वे कामाः श्रिताः ।
वयमु वा आपस्स्मः । अस्मान्नु यजस्व ।
अथ त्वयि सर्वे कामाः श्रयिष्यन्ते । अनु स्वर्गं ँ लोकं ँ वेथ्स्यसीति ।
स एतमग्नये कामाय पुरोडाश-मष्टाकपालं निरवपत् । अद्भ्यश्चरुं ।
अनुमत्यै चरुं । ततो वै तस्मिन्थ्-सर्वे कामा अश्रयन्त ।
अनु स्वर्गं ँ लोकमविन्दत् । सर्वे ह वा अस्मिन् कामाः श्रयन्ते ।
अनु स्वर्गं ँ लोकं ँ विन्दति । य एतेन हविषा यजते ।

य उचैनदेवं वेँद । सोऽत्र जुहोति ।

अग्नये कामाय स्वाहा ऽद्भ्यः स्वाहा ।

अनुमत्यै स्वाहा प्रजापतये स्वाहा ।

स्वर्गाय लोकाय स्वाहाऽग्नये स्विष्टकृते स्वाहेति ॥ **7 (19)**

**T.B.3.12.2.7**

तमग्नि र्बलिमानब्रवीत् ।

प्रजापते ऽग्नये वै बलिमते सर्वाणि भूतानि बलिꣳ हरन्ति ।

अहमु वा अग्नि र्बलिमानस्मि । मां नु यजस्व ।

अथ ते सर्वाणि भूतानि बलिꣳ हरिष्यन्ति ।

अनु स्वर्गं ँलोकं ँवेथ्स्यसीति ।

स एतमग्नये कामाय पुरोडाश–मष्टाकपाल–न्निरवपत् ।

अग्नये बलिमते चरुं । अनुमत्यै चरुं ।

ततो वै तस्मै सर्वाणि भूतानि बलि–महरन्न् ।

अनु स्वर्गं ँलोकमविन्दत् ।

सर्वाणि ह वा अस्मै भूतानि बलिꣳ हरन्ति ।

अनु स्वर्गं ँलोकं ँविन्दति । य एतेन हविषा यजते ।
य उचैनदेवं ँवेद । सोऽत्र जुहोति ।
अग्नये कामाय स्वाहा ऽग्नये बलिमते स्वाहा ।
अनुमत्यै स्वाहा प्रजापतये स्वाहा ।
स्वर्गाय लोकाय स्वाहाऽग्नये स्विष्टकृते स्वाहेति ॥ **8 (19)**

**T.B.3.12.2.8**

तमनुवित्तिर-ब्रवीत् । प्रजापते स्वर्गं ँवै लोकमनु-विवित्ससि ।
अहमु वा अनुवित्तिरस्मि । मां नु यजस्व ।
अथ ते सत्या ऽनुवित्ति-र्भविष्यति । अनु स्वर्गं ँलोकं ँवेथ्स्यसीति ।
स एतमग्नये कामाय पुरोडाश-मष्टाकपालं निरवपत् । अनुवित्त्यै चरुं ।
अनुमत्यै चरुं । ततो वै तस्य सत्या ऽनुवित्तिरभवत् ।
अनु स्वर्गं ँलोक-मविन्दत् । सत्या ह वा अस्यानुवित्ति-र्भवति ।
अनु स्वर्गं ँलोकं ँविन्दति । य एतेन हविषा यजते ।
य उचैनदेवं ँवेद । सोऽत्र जुहोति ।
अग्नये कामाय स्वाहा-ऽनुवित्त्यै स्वाहा ।
अनुमत्यै स्वाहा प्रजापतये स्वाहा ।

स्वर्गाय लोकाय स्वाहाऽग्नये स्विष्टकृते स्वाहेति ॥ **9 (19)**

**T.B.3.12.2.9**

ता वा एताः सप्त स्वर्गस्य लोकस्य द्वारः ।

दिवः श्येनयो ऽनुवित्तयो नाम । आशा प्रथमा॑ रक्षति ।

कामो द्वितीयां । ब्रह्म तृतीयां । यज्ञश्चतुर्थी । आपः पञ्चमीं ।

अग्नि र्बलिमान्–थ्षष्ठीं । अनुवित्तिः सप्तमीं ।

अनु ह वै स्वर्गं ँ॑लोकं ँ॑विन्दति ।

कामचारोऽस्य स्वर्गे लोके भवति । य एताभि–रिष्टिभि–र्यजते ।

य उचैना एवं ँ॑वेद । तास्वन्विष्टि । पष्ठौही वरां दद्यात् क॑ सञ्च ।

स्त्रियै चाभार॑ समृद्ध्यै ॥ **10 (16)**

**(No Korvai for Anuvaakam 2 )**

**3.12.3** अनुवाकं 3 –उपाघा नामेष्टयः

**T.B.3.12.3.1**

तपसा देवा देवता–मग्र आयन्न् । तपसर्.षयः स्वरन्वविन्दन्न् ।

तपसा सपत्नान् प्रणुदामारातीः । येनेदं ँ॑विश्वं परिभूतं ँ॑यदस्ति ॥

प्रथमजं देव॑ हविषा विधेम । स्वयंभु ब्रह्म परमं तपो यत् ।

स एव पुत्रः स पिता स माता । तपो ह यक्षं प्रथम॑ संबभूव ॥

श्रद्धया देवो देवत्व–मश्नुते । श्रद्धा प्रतिष्ठा लोकस्य देवी । **11 (10)**

**T.B.3.12.3.2**

सा नो जुषाणोप यज्ञ–मागात् । कामवथ्सा ऽमृतं दुहाना ॥

श्रद्धा देवी प्रथमजा ऋतस्य । विश्वस्य भर्त्री जगतः प्रतिष्ठा ।

ता॒ श्रद्धा॒ हविषा यजामहे । सा नो लोक–ममृतं दधातु ।

ईशाना देवी भुवनस्याधिपत्नी ॥ आगाथ्सत्य॒ हविरिदं जुषाणं ।

यस्माद्देवा जज्ञिरे भुवनञ्च विश्वे ।

तस्मै विधेम हविषा घृतेन । **12 (10)**

**T.B.3.12.3.3**

यथा देवैः सधमादं मदेम ॥ यस्य प्रतिष्ठो–र्वन्तरिक्षं ।

यस्माद्देवा जज्ञिरे भुवनञ्च सर्वे ।

तथ्सत्य–मर्चदुपयज्ञं न आगात् । ब्रह्माहुती–रुपमोदमानं ॥

मनसो वशे सर्वमिदं बभूव ।

नान्यस्य मनो वशमन्वियाय ।

भीष्मो हि देवः सहसः सहीयान् ।

स नो जुषाण उप यज्ञमागात् ॥

आकूतीना–मधिपतिं चेतसां च । **13 (10)**

**T.B.3.12.3.4**

सङ्कल्पजूतिं देवं ँविपश्चिं । मनो राजानमिह वर्द्धयन्तः ।
उपहवे ऽस्य सुमतौ स्याम ॥ चरणं पवित्रं ँविततं पुराणं ।
येन पूतस्तरति दुष्कृतानि । तेन पवित्रेण शुद्धेन पूताः ।
अति पाप्मान–मरातिं तरेम ॥ लोकस्य द्वार–मर्चिमत् पवित्रं ।
ज्योतिष्मद् भ्राजमानं महस्वत् । अमृतस्य धारा बहुधा दोहमानं ( ) ।
चरणं नो लोके सुधितां दधातु ॥ "अग्नि मूर्द्धा{**41**}" "भुवः{**42**}" ॥
"अनु नोऽद्यानुमति{**43**}" "रन्विदनुमतेत्वं{**44**}" ॥
"हव्यवाह७{**45**}" "स्विष्टं{**46**}" ॥ **14 (14)**

*(देवी – घृतेन – चेतसां च – दोहमानं चत्वारि च) (A3)*

**3.12.4** अनुवाकं 4 –तासां ब्राह्मणम्

**T.B.3.12.4.1**

देवेभ्यो वै स्वर्गो लोकस्तिरो ऽभवत् । ते प्रजापति–मब्रुवन्न् ।
प्रजापते स्वर्गो वै नो लोकस्तिरोऽभूत् । तमन्विच्छेति ।
तं ँयज्ञक्रतुभि–रन्वैच्छत् । तं ँयज्ञक्रतुभि र्नान्वविन्दत् ।

तमिष्टिभि-रन्वैच्छत् । तमिष्टिभि-रन्वविन्दत् । तदिष्टीना-मिष्टित्वं ।
एष्टयो ह वै नाम । ता इष्टय इत्या चक्षते परोक्षेण ।
परोक्षप्रिया इव हि देवाः ॥ **15 (12)**

**T.B.3.12.4.2**

तं तपोऽ ब्रवीत् । प्रजापते तपसा वै श्राम्यसि ।
अहमु वै तपोऽ स्मि । मां नु यजस्व ।
अथ ते सत्यं तपो भविष्यति । अनु स्वर्गं ँल्लोकं ँवेथ्स्यसीति ।
स एतमाग्नेय-मष्टाकपालं निरवपत् । तपसे चरुं ।
अनुमत्यै चरुं । ततो वै तस्य सत्यं तपो ऽभवत् ।
अनु स्वर्गं ँल्लोकमविन्दत् । सत्य ँ ह वा अस्य तपो भवति ।
अनु स्वर्गं ँल्लोकं ँविन्दति । य एतेन हविषा यजते ।
य उ चैनदेवं ँवेद । सोऽत्र जुहोति । अग्नये स्वाहा तपसे स्वाहा ।
अनुमत्यै स्वाहा प्रजापतये स्वाहा ।
स्वर्गाय लोकाय स्वाहाऽग्नये स्विष्टकृते स्वाहेति ॥ **16 (19)**

**T.B.3.12.4.3**

तᳶ श्रद्धा-ऽब्रवीत् । प्रजापते श्रद्धया वै श्राम्यसि ।

अहमु वै श्रद्धाऽस्मि । मां नु यजस्व ।

अथ ते सत्या श्रद्धा भविष्यति । अनु स्वर्गँ लोकँ वेथ्स्यसीति ।

स एतमाऽग्नेय-मष्टाकपालं निरवपत् । श्रद्धायै चरुं ।

अनुमत्यै चरुं । ततो वै तस्य सत्या श्रद्धाऽभवत् ।

अनु स्वर्गँ लोकमविन्दत् । सत्या ह वा अस्य श्रद्धा भवति ।

अनु स्वर्गँ लोकँ विन्दति । य एतेन हविषा यजते ।

य उ चैनदेवँ वेद । सोऽत्र जुहोति । अग्नये स्वाहा श्रद्धायै स्वाहा ।

अनुमत्यै स्वाहा प्रजापतये स्वाहा ।

स्वर्गाय लोकाय स्वाहाऽग्नये स्विष्टकृते स्वाहेति ॥ **17 (19)**

**T.B.3.12.4.4**

तᳶ सत्य-मब्रवीत् । प्रजापते सत्येन वै श्राम्यसि ।

अहमु वै सत्यमस्मि । मां नु यजस्व ।

अथ ते सत्यᳶ सत्यं भविष्यति । अनु स्वर्गँ लोकँ वेथ्स्यसीति ।

स एतमाऽग्नेय-मष्टाकपालं निरवपत् । सत्याय चरुं ।

अनुमत्यै चरुं । ततो वै तस्य सत्यꣳ सत्यमभवत् ।

अनु स्वर्गं ँलोकमविन्दत् । सत्यꣳ ह वा अस्य सत्यं भवति ।

अनु स्वर्गं ँलोकं ँविन्दति । य एतेन हविषा यजते ।

य उचैनदेवं ँवेद । सोऽत्र जुहोति । अग्नये स्वाहा सत्याय स्वाहा ।

अनुमत्यै स्वाहा प्रजापतये स्वाहा ।

स्वर्गाय लोकाय स्वाहाऽग्नये स्विष्टकृते स्वाहेति ॥ **18 (19)**

**T.B.3.12.4.5**

तं मनोऽब्रवीत् । प्रजापते मनसा वै श्राम्यसि ।

अहमु वै मनोऽस्मि । मां नु यजस्व ।

अथ ते सत्यं मनो भविष्यति । अनु स्वर्गं ँलोकं ँवेथ्स्यसीति ।

स एतमाऽग्नेय-मष्टाकपालं निरवपत् । मनसे चरुं ।

अनुमत्यै चरुं । ततो वै तस्य सत्यं मनोऽभवत् ।

अनु स्वर्गं ँलोकमविन्दत् । सत्यꣳ ह वा अस्य मनो भवति ।

अनु स्वर्गं ँलोकं ँविन्दति । य एतेन हविषा यजते ।

य उचैन देवं ँवेद । सोऽत्र जुहोति ।

अग्नये स्वाहा मनसे स्वाहा ।

अनुमत्यै स्वाहा प्रजापतये स्वाहा ।

स्वर्गाय लोकाय स्वाहाऽग्नये स्विष्टकृते स्वाहेति ॥ **19 (19)**

**T.B.3.12.4.6**

तं चरण-मब्रवीत् । प्रजापते चरणेन वै श्राम्यसि ।

अहमु वै चरणमस्मि । मां नु यजस्व ।

अथ ते सत्यं चरणं भविष्यति । अनु स्वर्गं ँलोकं ँवेथ्स्यसीति ।

स एतमाऽग्नेय-मष्टाकपालं निरवपत् । चरणाय चरुं ।

अनुमत्यै चरुं । ततो वै तस्य सत्यं चरणमभवत् ।

अनु स्वर्गं ँलोकमविन्दत् । सत्यꣳ ह वा अस्य चरणं भवति ।

अनुस्वर्गं ँलोकं ँविन्दति । य एतेन हविषा यजते ।

य उचैनदेवं ँवेद । सोऽत्र जुहोति ।

अग्नये स्वाहा चरणाय स्वाहा । अनुमत्यै स्वाहा प्रजापतये स्वाहा ।

स्वर्गाय लोकाय स्वाहाऽग्नये स्विष्टकृते स्वाहेति ॥ **20 (19)**

**T.B.3.12.4.7**

ता वा एताः पञ्च स्वर्गस्य लोकस्य द्वारः ।

अपाघा अनुवित्तयो नाम । तपः प्रथमाꣳ रक्षति ।

श्रद्धा द्वितीयां । सत्यं तृतीयां । मनश्चतुर्थीं । चरणं पञ्चमीं ।
अनु ह वै स्वर्गँ लोकँ विन्दति ।
कामचारोऽस्य स्वर्गे लोके भवति । य एताभि-रिष्टिभि-र्यजते ।
य उचैना एवं वेद ।
तास्वन्विष्टि । पष्ठौही वरां दद्यात् कꣳसञ्च ।
स्त्रियै चाभारꣳ समृद्ध्यै ॥ **21 (14)**

**(No Korvai for Anuvaakam 4 )**

**3.12.5** अनुवाकं 5 –चातुर्होत्रचयनम्

**T.B.3.12.5.1**

ब्रह्म वै चतुर्.होतारः । चतुर्.होतृभ्योऽधि यज्ञो निर्मितः ।
नैनꣳ शप्तं । नाभिचरित-मागच्छति । य एवं वेद ॥
यो ह वै चतुर्.होतृणां चतुर्.होतृत्वं वेद ।
अथो पञ्च होतृत्वं । सर्वा हास्मै दिशः कल्पन्ते ।
वाचस्पतिर्. होता दशहोतृणां । पृथिवी होता चतुर्.होतृणां । **22 (10)**

**T.B.3.12.5.2**

अग्निर्. होता पञ्चहोतृणां । वाग्घोता षड्ढोतृणां ।
महाहविर्. होता सप्तहोतृणां । एतद्वै चतुर्.होतृणां चतुर्.होतृत्वं ।

अथो पञ्चहोतृत्वं । सर्वा हास्मै दिशः कल्पन्ते । य एवं वेद ॥

एषा वै सर्व विद्या । एतद् भेषजं ।

एषा पङ्क्तिः स्वर्गस्य लोकस्यां जसायनिः सृतिः । **23 (10)**

**T.B.3.12.5.3**

एतान्. योऽद्ध्यै–त्यछदिर्दर्.शे यावत्तरसं । स्वरेति ।

अनपब्रवः सर्वमायुरेति । विन्दते प्रजां । रायस्पोषं गौपत्यं ।

ब्रह्मवर्चसी भवति ॥ एतान्. योऽद्ध्यैति । स्पृणोत्यात्मानं ।

प्रजां पितॄन् ॥ एतान्. वा अरुण औपवेशि र्विदाञ्चकार । **24 (10)**

**T.B.3.12.5.4**

एतैरधिवादमपाजयत् । अथो विश्वं पाप्मानं ।

स्वर्ययौ । एतान्. योऽद्ध्यैति । अधिवादं जयति ।

अथो विश्वं पाप्मानं । स्वरेति ॥

एतैरग्निं चिन्वीत स्वर्गकामः ।

एतैरायुष्कामः । प्रजा पशुकामो वा ॥ **25 (10)**

**T.B.3.12.5.5**

पुरस्ता–द्दशहोतार–मुदञ्च–मुपदधाति यावत्पदं ।

हृदयं यजुषी पत्न्यौ च । दक्षिणतः प्राञ्चं चतुर्.होतारं ।

पश्चादुदञ्चं पञ्च होतारं । उत्तरतः प्राञ्चꣳ षड्ढोतारं ।

उपरिष्टात् प्राञ्चꣳ सप्तहोतारं । हृदयं ँयजूꣳषि पत्न्यश्च ।

यथावकाशं ग्रहान् । यथावकाशं प्रतिग्रहान् ँलोकं पृणाश्च ।

सर्वा हास्यैता देवताः प्रीता अभीष्टा भवन्ति । **26 (10)**

**T.B.3.12.5.6**

सदेवमग्निं चिनुते ॥ रथसंमित-श्चेतव्यः । वज्रो वै रथः ।

वज्रेणैव पाप्मानं भ्रातृव्यꣳ स्तृणुते । पक्षः संमित-श्चेतव्यः ।

एतावान्. वै रथः । यावत्पक्षः । रथसंमितमेव चिनुते ॥

इममेव लोकं पशुबन्धेनाभिजयति । अथो अग्निष्टोमेन । **27 (10)**

**T.B.3.12.5.7**

अन्तरिक्ष-मुक्थ्येन । स्वरतिरात्रेण । सर्वान् ँलोकानहीनेन ।

अथो सत्रेण ॥ वरो दक्षिणा । वरेणैव वरꣳ स्पृणोति ।

आत्मा हि वरः ॥ एकविꣳशति दक्षिणा ददाति ।

एकविꣳशो वा इतः स्वर्गो लोकः । प्रस्वर्गं ँलोकमाप्नोति । **28 (10)**

**T.B.3.12.5.8**

असावादित्य एकविꣳशः । अमुमेवा-दित्यमाप्नोति ॥

शतं ददाति । शतायुः पुरुषः शतेन्द्रियः ।

आयुष्येवेन्द्रिये प्रतितिष्ठति ॥ सहस्रं ददाति ।
सहस्र संमितः स्वर्गो लोकः । स्वर्गस्य लोकस्या–भिजित्यै ॥
अन्विष्टकं दक्षिणा ददाति । सर्वाणि वयाꣳसि । **29 (10)**

**T.B.3.12.5.9**

सर्वस्याप्त्यै । सर्वस्या–वरुद्ध्यै ॥ यदि न विन्देत ।
मन्थानेतावतो दद्यादोदनान्. वा । अश्नुते तं कामं ।
यस्मै कामाया–ग्निश्चीयते ॥ पष्ठौहीं त्वन्तर्वतीं दद्यात् ।
सा हि सर्वाणि वयाꣳसि । सर्वस्याप्त्यै । सर्वस्या–वरुद्ध्यै ॥ **30 (10)**

**T.B.3.12.5.10**

हिरण्यं ददाति । हिरण्य–ज्योतिरेव स्वर्गँ लोकमेति ॥
वासो ददाति । तेनायुः प्रतिरते ॥ वेदितृतीये यजेत ।
त्रिषत्या हि देवाः । स सत्यमग्निं चिनुते ॥
तदेतत् पशुबन्धे ब्राह्मणं ब्रूयात् । नेतरेषु यज्ञेषु ॥
यो ह वै चतुर्.होतॄ–ननुसवनं तर्पयितव्यान्. वेद । **31 (10)**

**T.B.3.12.5.11**

तृप्यति प्रजया पशुभिः । उपैनꣳ सोमपीथो नमति ।
एते वै चतुर्.होतारो ऽनुसवनं तर्पयितव्याः । ये ब्राह्मणा बहुविदः ।

तेभ्यो यद्दक्षिणा न नयेत् । दुरिष्टꣳ स्यात् । अग्निमस्य वृञ्जीरन्न् ।
तेभ्यो यथा श्रद्धं दद्यात् । स्विष्टमेवैतत्क्रियते ।
नास्याग्निं वृँञ्जते ॥ **32 (10)**

**T.B.3.12.5.12**

हिरण्येष्टको भवति । यावदुत्तम–मङ्गुलि–काण्डं यँज्ञ परुषा संमितं ।
तेजो हिरण्यं ॥ यदि हिरण्यं न विन्देत् । शर्करा अक्ता उपदद्ध्यात् ।
तेजो घृतं । सतेजसमे–वाग्निं चिनुते ॥
अग्निञ्चित्वा सौत्रामण्या यजेत मैत्रावरुण्या वा ।
वीर्येण वा एष व्यृद्ध्यते ।
योऽग्निञ्चिनुते ( ) । **33 (10)**

**T.B.3.12.5.13**

यावदेव वीर्यं । तदस्मिन् दधाति ॥
ब्रह्मणः सायुज्यꣳ सलोकता–माप्नोति ।
एतासामेव देवतानाꣳ सायुज्यं ।
सार्ष्टिताꣳ समान लोकता–माप्नोति । य एतमग्निं चिनुते ।
य उचैनमेवं वँद ॥ एतदेव सावित्रे ब्राह्मणं । अथो नाचिकेते ॥ **34 (9)**

*(होता चतुर्.होतृणा॰ – स्तुति – श्चकार – वा – भवन्त्य – ग्निष्टोमेना – प्नोति – वया॑ँसि – वया॑ँसि – सर्वस्याप्त्यै सर्वस्यावरुद्ध्यै – वेद – वृञ्जते – चिनुते – +नव च) (A5)*

**3.12.6** अनुवाकं 6 –वैश्वसृजचयनम्

**T.B.3.12.6.1**

यच्चामृतं ँयच्च मर्त्यं । यच्च प्राणिति यच्च न ।

सर्वास्ता इष्टकाः कृत्वा । उप कामदुघा दधे ।

तेनर्.षिणा तेन ब्रह्मणा । तया देवतया–ऽङ्गिरस्वद्–ध्रुवा सीद ॥

सर्वाः स्त्रियः सर्वान् पु॑ँसः । सर्वं न स्त्री–पुमञ्च यत् ।

सर्वास्ताः ॥ यावन्तः पा॑ँसवो भूमेः । **35 (10)**

**T.B.3.12.6.2**

सङ्ख्याता देवमायया । सर्वास्ताः ॥ यावन्त ऊषाः पशूनां ।

पृथिव्यां पुष्टि र्हिताः । सर्वास्ताः ॥ यावतीः सिकताः सर्वाः ।

अफ्स्वन्तश्च याः श्रिताः । सर्वास्ताः ॥ यावतीः शर्करा धृत्यै ।

अस्यां पृथिव्यामधि । **36 (10)**

**T.B.3.12.6.3**

सर्वास्ताः ॥ यावन्तो–ऽश्मानोऽस्यां पृथिव्यां ।
प्रतिष्ठासु प्रतिष्ठिताः । सर्वास्ताः ॥ यावती वीरुधः सर्वाः ।
विष्ठिताः पृथिवीमनु । सर्वास्ताः ॥ यावतीरोषधीः सर्वाः ।
विष्ठिताः पृथिवीमनु । सर्वास्ताः ॥ **37 (10)**

**T.B.3.12.6.4**

यावन्तो वनस्पतयः । अस्यां पृथिव्यामधि । सर्वास्ताः ॥
यावन्तो ग्राम्याः पशवः सर्वे । आरण्याश्च ये ।
सर्वास्ताः ॥ ये द्विपाद–श्चतुष्पादः । अपाद उदरसर्पिणः ।
सर्वास्ताः ॥ यावदाञ्ज–नमुच्यते । **38 (10)**

**T.B.3.12.6.5**

देवत्रा यच्च मानुषं । सर्वास्ताः ॥ यावत्कृष्णायस॒ꣳ सर्वं ।
देवत्रा यच्च मानुषं । सर्वास्ताः ॥ याव ल्लोहायस॒ꣳ सर्वं ।
देवत्रा यच्च मानुषं । सर्वास्ताः ॥ सर्व॒ꣳ सीस॒ꣳ सर्वं त्रपु ।
देवत्रा यच्च मानुषं । **39 (10)**

**T.B.3.12.6.6**

सर्वास्ताः ॥ सर्व॑ हिरण्य॑ रजतं । देवत्रा यच्च मानुषं ।

सर्वास्ताः ॥ सर्व॑ सुवर्ण॑ हरितं । देवत्रा यच्च मानुषं ।

सर्वास्ता इष्टकाः कृत्वा । उपकामदुघा दधे ।

तेनर्.षिणा तेन ब्रह्मणा ।

तया देवतया-ऽङ्गिरस्वद्-ध्रुवा सीद ( ) ॥ **40 (10)**

*[भूमे - रधि - विष्ठिताः पृथिवीमनु सर्वास्ता - उच्यते - मानुष॑ - सीद ( ) ] (A6)*

**Special Korvai**

(यच्च स्त्रियः पा॑सव ऊषाः सिकताः शर्करा अश्मानो वीरुध ओषधीर् वनस्पतयो ग्राम्या ये द्विपादो यावदाञ्जनं यावत् कृष्णायसं ँलोहायस॑ सीस॑ हिरण्य॑ सुवर्ण॑ हरितमष्टादश)

**3.12.7** अनुवाकं 7 –वैश्वसृजचयनम्

**T.B.3.12.7.1**

सर्वा दिशो दिक्षु । यच्चान्त भूतं प्रतिष्ठितं ।

सर्वास्ता इष्टकाः कृत्वा । उप कामदुघा दधे ।

तेनर्.षिणा तेन ब्रह्मणा । तया देवतया-ऽङ्गिरस्वद्-ध्रुवा सीद ॥

अन्तरिक्षञ्च केवलं । यच्चास्मि–न्नन्तराहितं ।
सर्वास्ताः ॥ आन्तरिक्ष्यश्च याः प्रजाः । **41 (10)**

**T.B.3.12.7.2**

गन्धर्वा–फ्सरसश्च ये । सर्वास्ताः ॥ सर्वानुदारान्–थ्सलिलान् ।
अन्तरिक्षे प्रतिष्ठितान् । सर्वास्ताः ॥ सर्वानुदारान्–थ्सलिलान् ।
स्थावराः प्रोष्याश्च ये । सर्वास्ताः ॥ सर्वा धुनिꣳ सर्वान्–ध्वꣳसान् ।
हिमो यच्च शीयते । **42 (10)**

**T.B.3.12.7.3**

सर्वास्ताः ॥ सर्वान् मरीचीन्. विततान् । नीहारो यच्च शीयते ।
सर्वास्ताः ॥ सर्वा विद्युतः सर्वान्थ् स्तनयित्नून् ।
ह्रादुनी र्यच्च शीयते । सर्वास्ताः ॥ सर्वाः स्रवन्तीः सरितः ।
सर्वमफ्सु चरञ्च यत् । सर्वास्ताः ॥ **43 (10)**

**T.B.3.12.7.4**

याश्च कूप्या याश्च नाद्याः समुद्रियाः । याश्च वैशन्तीरुत प्रासचीर्याः ।
सर्वास्ताः ॥ ये चोत्तिष्ठन्ति जीमूताः । याश्च वर्.षन्ति वृष्टयः ।
सर्वास्ताः ॥ तपस्तेज आकाशं । यच्चाकाशे प्रतिष्ठितं ।
सर्वास्ताः ॥ वायुं वयाꣳसि सर्वाणि । **44 (10)**

**T.B.3.12.7.5**

अन्तरिक्षचरञ्च यत् । सर्वास्ताः ॥ अग्निꣳ सूर्यं चन्द्रं ।
मित्रं ँवरुणं भगं । सर्वास्ताः ॥ सत्यꣳ श्रद्धां तपो दमं ।
नाम रूपञ्च भूतानां । सर्वास्ता इष्टकाः कृत्वा ।
उप कामदुघा दधे । तेनर्.षिणा तेन ब्रह्मणा ( ) ।
तया देवतया–ऽङ्गिरस्वद्–ध्रुवा सीद ॥ **45 (11)**

*(प्रजा–हिमो यच्च शीयते–सर्वास्ताः–सर्वाणि–ब्रह्मणैकं च) (A7)*

**Special Korvai**
(दिशोऽन्तरिक्षमान्तरिक्ष्य उदारानुदारान् धुनिं मरीचीन्. विद्युतः
स्रवन्तीर्याश्च ये च तपो वायुमग्निꣳ सत्यं पञ्चदश)

**3.12.8** अनुवाकं 8 –वैश्वसृजचयनम्

**T.B.3.12.8.1**

सर्वां दिवꣳ सर्वान् देवान् दिवि । यच्चान्त भूतं प्रतिष्ठितं ।
सर्वास्ता इष्टकाः कृत्वा । उप कामदुघा दधे । तेनर्.षिणा तेन ब्रह्मणा ।
तया देवतया–ऽङ्गिरस्वद–ध्रुवा सीद ॥ यावती स्तारकाः सर्वाः ।
वितता रोचने दिवि । सर्वास्ताः ॥ ऋचो यजूꣳषि सामानि । **46 (10)**

**T.B.3.12.8.2**

अथर्वाङ्गिरसश्च ये । सर्वास्ताः ॥ इतिहासपुराणञ्च ।

सर्पदेवजनाश्च ये । सर्वास्ताः ॥ ये च लोका ये चालोकाः ।

अन्त र्भूतं प्रतिष्ठितं । सर्वास्ताः ॥ यच्च ब्रह्म यच्चाब्रह्म ।

अन्त र्ब्रह्मन् प्रतिष्ठितं । **47 (10)**

**T.B.3.12.8.3**

सर्वास्ताः ॥ अहोरात्राणि सर्वाणि । अर्द्धमासाꣳश्च केवलान् ।

सर्वास्ताः ॥ सर्वानृतून्–थ्सर्वान् मासान् । सम्ँवथ्सरञ्च केवलं ।

सर्वास्ताः ॥ सर्वं भूतꣳ सर्वं भव्यं । यच्चातोऽधि भविष्यति ।

सर्वास्ता इष्टकाः कृत्वा ( ) । उप कामदुघा दधे ।

तेनर्.षिणा तेन ब्रह्मणा ।

तया देवतया–ऽङ्गिरस्वद्–ध्रुवा सीद ॥ **48 (13)**

*(सामानि – ब्रह्मन् प्रतिष्ठितं – कृत्वा त्रीणि च) (A8)*

**Special Korvai**

(दिवं तारका ऋच इतिहासपुराणं च ये च यच्चाहोरात्राण्यृतून् भूतं नव)

## 3.12.9 अनुवाकं 9 -ब्रह्मा सदस्यासीनो वौश्वसृजान् व्याचष्टे

**T.B.3.12.9.1**

ऋचां प्राची महती दिगुच्यते । दक्षिणा-माहु र्यजुषामपारां ।
अथर्वणा-मङ्गिरसां प्रतीची । साम्ना-मुदीची महती दिगुच्यते ॥
ऋग्भिः पूर्वाह्णे दिवि देव ईयते । यजुर्वेदे तिष्ठति मद्ध्ये अह्नः ।
सामवेदे-नास्तमये महीयते । वेदै-रशून्य-स्त्रिभिरेति सूर्यः ॥
ऋग्भ्यो जाता॑ सर्वशो मूर्त्ति-माहुः ।
सर्वा गति र्याजुषी हैव शश्वत् । **49 (10)**

**T.B.3.12.9.2**

सर्वं तेज स्सामरूप्य॑ ह शश्वत् । सर्व॑ हेदं ब्रह्मणा हैव सृष्टं ॥
ऋग्भ्यो जातं वैश्यं वर्ण-माहुः । यजुर्वेदं क्षत्रियस्या-हुर्योनिं ।
सामवेदो ब्राह्मणानां प्रसूतिः । पूर्वे पूर्वेभ्यो वच एत-दूचुः ॥
आदर्.श-मग्निं चिन्वानाः । पूर्वे विश्व सृजोऽमृताः ।
शतं वर्.ष सहस्राणि । दीक्षिताः सत्र-मासत ॥ **50 (10)**

**T.B.3.12.9.3**

तप आसीद् गृहपतिः । ब्रह्म ब्रह्माभवथ् स्वयं ।
सत्य॑ ह हो तैषामासीत् । यद् विश्वसृज आसत ॥

अमृत–मेभ्य उदगायत् । सहस्रं परिवथ्सरान् ।
भूत॒ह प्रस्तो तैषामासीत् । भविष्यत् प्रति चाहरत् ॥
प्राणो अद्ध्वर्यु–रभवत् । इद॒ सर्व॒ सिषासतां । **51 (10)**

**T.B.3.12.9.4**

अपानो विद्वा–नावृतः । प्रति प्रातिष्ठ–दद्ध्वरे ॥
आर्तवा उपगातारः । सदस्या ऋतवो–ऽभवन् ।
अर्द्धमासाश्च मासाश्च । चमसा–द्ध्वर्यवो–ऽभवन् ॥
अश॒ सद् ब्रह्मण–स्तेजः । अच्छावाको ऽभवद् यशः ।
ऋत–मेषां प्रशास्ता–ऽऽसीत् ।
यद् विश्व सृज आसत ॥ **52 (10)**

**T.B.3.12.9.5**

ऊर्ग्–राजान–मुदवहत् । ध्रुव गोपः सहो–ऽभवत् ।
ओजो–ऽभ्यष्टौद् ग्राव्.ण्णः । यद् विश्व सृज आसत ॥
अपचितिः पोत्रीया–मयजत् । नेष्ट्रीया–मयजत् त्विषिः ।
आग्नीद्ध्राद् विदुषी सत्यं । श्रद्धा हैवा यजथ् स्वयं ॥
इरा पत्नी विश्व सृजां । आकूति–रपिनड्विः । **53 (10)**

**T.B.3.12.9.6**

इद्ध्मꣳ ह क्षुच् चैभ्य उग्रे । तृष्णा चा वहतामुभे ॥
वागेषाꣳ सुब्रह्मण्या–ऽऽसीत् । छन्दो योगान्. विजानती ।
कल्पतन्त्राणि तन्वाना–ऽहः । सꣳस्थाश्च सर्वशः ॥
अहोरात्रे पशुपाल्यौ । मुहूर्त्ताः प्रेष्या अभवन्न् ।
मृत्युस् तद–भव–द्धाता । शमितो ग्रो विशां पतिः ॥ **54 (10)**

**T.B.3.12.9.7**

विश्वसृजः प्रथमाः सत्र–मासत । सहस्र समं प्रसुतेन यन्तः ।
ततो ह जज्ञे भुवनस्य गोपाः । हिरण्मयः शकुनि ब्रह्म नाम ॥
येन सूर्य–स्तपति तेजसे–द्धः । पिता पुत्रेण पितृमान्. योनियोनौ ।
नावेदविन् मनुते तं बृहन्तं । सर्वानुभु–मात्मानꣳ संपराये ॥
एष नित्यो महिमा ब्राह्मणस्य ।
न कर्मणा वर्द्धते नो कनीयान् । **55 (10)**

**T.B.3.12.9.8**

तस्यैवात्मा पदवित्तं ँविदित्वा । न कर्मणा लिप्यते पापकेन ॥
पञ्चपञ्चाशत–स्त्रिवृतः सम्ँवथ्सराः ।
पञ्चपञ्चाशतः पञ्चदशाः । पञ्चपञ्चाशतः सप्तदशाः ।

पञ्चपञ्चाशत एकविꣳशाः ।

विश्वसृजाꣳ सहस्र सम्ँवथ्सरं ॥

एतेन वै विश्वसृज इदं ँविश्व–मसृजन्त ।

यद् विश्व–मसृजन्त । तस्माद् विश्वसृजः ( ) ॥

विश्व–मेना–ननु प्रजायते । ब्रह्मणः सायुज्यꣳ सलोकतां ँयन्ति ।

एतासामेव देवतानाꣳ सायुज्यं । सार्ष्टिताꣳ समान लोकतां ँयन्ति ।

य एत–दुपयन्ति । ये चैनत् प्राहुः ।

येभ्य–श्चैनत् प्राहुः ॥

ओं ॥ **56 (18)**

*(शश्व – दासत – सिषासता – मासत – हविष् – पतिः – कनीयान् – तस्माद् विश्वसृजोऽष्टौ च) (A9)*

=====================

**Prapaataka Korvai with starting Padams of 1 to 9 Anuvaakams :-**

(तुभ्यं – देवेभ्य – स्तपसा – देवेभ्यो – ब्रह्म वै चतुर्.होतारो – यच्चामृतं – सर्वा दिशो दिक्षु – सर्वां दिव – मृचां प्राची नव)

**Korvai with starting Padams of 1, 11, 21 Series of Dasinis :-**

(तुभ्यं – तपसा – ता वा एताः पञ्च – हिरण्यं ददाति – सर्वा दिश – स्तप आसीद्गृहपतिः षट्पञ्चाशत्)

**First and Last Padam 3rd Prapaatakam of Kaatakam:-**

(तुभ्य–मों)

॥ हरिः ओं ॥

॥ तैत्तिरीय यजुर्ब्राह्मणे काठके तृतीय प्रश्नः समाप्तः ॥

॥ इति तैत्तिरीय यजुर्ब्राह्मणे काठकं समाप्तं ॥

===================

## Appendix (of expansions)

**T.B.3.12.1.1 – तुभ्यन्ता अङ्गिरस्तमा{21} श्याम तङ्काममग्ने {22}**

तुभ्यं ता अङ्गिरस्तम विश्वाः सुक्षितयः पृथक् ।
अग्ने कामाय येमिरे ॥ {21}

अश्याम तं काममग्ने तवो त्यश्याम रयिꣳ रयिवः सुवीरं ।
अश्याम वाजमभि वाजयन्तो ऽश्याम द्युम्नमजराजरं ते ॥

**(Both {21} and {22} appearing in TS 1.3.14.3)**

---------------------------------------------------------------

**T.B.3.12.1.1 – आशानां त्वा{23} विश्वा आशाः{24}**

आशानां त्वा ऽऽशापालेभ्यः । चतुर्भ्यो अमृतेभ्यः ।
इदं भूतस्याध्यक्षेभ्यः । विधेम हविषा वयम् ॥ {23}

विश्वा आशा मधुना सꣳसृजामि । अनमीवा आप ओषधयो भवन्तु ।
अयं ँयजमानो मृधो व्यस्यताम् अगृभीताः पशवः सन्तु सर्वे ॥ {24}

**(Both {23} and {24} appearing in T.B.2.5.3.3)**

---------------------------------------------------------------

T.B.3.12.1.1 – अनु नोऽद्यानुमति{25} रन्विदनुमते त्वं{26}

अनु नोऽद्याऽनुमतिर्यज्ञं देवेषु मन्यतां ।
अग्निश्च हव्यवाहनो भवतां दाशुषे मयः ॥ {25}

अन्विदनुमते त्वं मन्यासै शञ्चनः कृधि ।
क्रत्वे दक्षाय नो हिनु प्रण आयूꣳषि तारिषः ॥ {26}

**(Both {25} and {26} appearing in T.S.3.11.3.3)**

---

T.B.3.12.1.1 – कामो भूतस्य{27} कामस्तदग्रे{28}

कामो भूतस्य भव्यस्य । सम्राडेको विराजति । स इदं प्रति पप्रथे ।
ऋतूनुथ् सृजते वशी ॥ {27}

कामस्तदग्रे समवर्तताधि । मनसो रेतः प्रथमं ँयदासीत् ।
सतो बन्धुमसति निरविन्दन् । हृदि प्रतीष्या कवयो मनीषा ॥ {28}

**(Both {27} and {28} appearing in T.B.2.4.1.9 and T.B.2.4.1.10**

---

**T.B.3.12.1.1 – ब्रह्म जज्ञानं{29} पिता विराजां{30}**

ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः ।
स बुध्नियां उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥ {29}

**({29} appearing in T.S.4.2.8.2)**

पिता विराजामृषभो रयीणां । अन्तरिक्षं विश्वरूप आविवेश ।
तमर्कै–रभ्यर्चन्ति वत्सं । ब्रह्म सन्तं ब्रह्मणा वर्द्धयन्तः ॥ {30}

**({30} appearing in T.B.2.8.8.9)**

--------------------------------------------------------------

**T.B.3.12.1.1 – यज्ञो रायो{31} ऽयं यज्ञः{32}**

यज्ञो रायो यज्ञ ईशे वसूनाम् । यज्ञः सस्यानामुत सुक्षितीनाम् ।
यज्ञ इष्टः पूर्वचित्तिं दधातु । यज्ञो ब्रह्मण्वाँ अप्येतु देवान् ॥ {31}

अयं यज्ञो वर्धतां गोभिरश्वैः । इयं वेदिः स्वपत्या सुवीरा ।
इदं बर्.हिरति बर्.हीँष्यन्या । इमं यज्ञं विश्वे अवन्तु देवाः ॥ {32}

**(Both {31} and {32} appearing in T.B.2.5.5.1)**

--------------------------------------------------------------

**T.B.3.12.1.1 – आपो भद्रा{33} आदित्पश्यामि{34}**

आपो भद्रा घृतमिदाप आसुरग्नी–षोमौ बिभ्रत्याप इत् ताः ।
तीव्रो रसो मधुपृचा मरंगम आ मा प्राणेन सह वर्चसा गन्न् ॥ {33}

आदित् पश्याम्युत वा शृणोम्या मा घोषो गच्छति वाङ्न आसां ।
मन्ये भेजानो अमृतस्य तर्.हि हिरण्यवर्णा अतृपं यँदा वः ॥ {34}

**(Both {33} and {34} appearing in T.S.5.6.1.3 and 5.6.1.4)**

------------------------------------------------------------

**T.B.3.12.1.1 – तुभ्यं भरन्ति{35] यो देह्यः{36}**

तुभ्यं भरन्ति क्षितयो यविष्ठ । बलिमग्ने अन्ति त ओत दूरात् ।
आ भन्दिष्ठस्य सुमतिं चिकिद्धि । बृहत्ते अग्ने महि शर्म भद्रम् ॥ {35}

यो देह्यो अनमयद्वधस्नैः । यो अर्यपत्नी–रुषसश्चकार ।
स निरुध्या नहुषो यह्वो अग्निः । विशश्चक्रे बलिहृतः सहोभिः ॥ {36}

**(Both {35} and {36} appearing in T.B.2.4.7.9)**

------------------------------------------------------------

**T.B.3.12.1.1 - पूर्वं देवा अपरेण{37} प्राणापानौ{38}**

पूर्वं देवा अपरेणा–नुपश्यञ्जन्मभिः । जन्मान्यवरैः पराणि ।
वेदानि देवा अयमस्मीति माम् । अह२ं हित्वा शरीरं जरसः
परस्तात् ॥ {37}

प्राणापानौ चक्षुः श्रोत्रम् । वाचं मनसि संभृताम् ।
हित्वा शरीरं जरसः परस्तात् । आ भूतिं भूतिं वयमश्नवामहै ॥ {38}

**(Both {37} and {38} appearing in T.B.2.5.6.5)**

---

**T.B.3.12.1.1 – हव्यवाह{39} स्विष्टं{40}**

हव्यवाह–मभिमातिषाऽहम् । रक्षोहणं पृतनासु जिष्णुम् ।
ज्योतिष्मन्तं दीद्यतं पुरन्धिम् । अग्नि२ं स्विष्टकृतमा हुवेम ॥ {39}

स्विष्टमग्ने अभि तत् पृणाहि । विश्वा देव पृतना अभिष्य ।
उरुं नः पन्थां प्रदिशन्वि भाहि । ज्योतिष्मद्धेह्यजरं न आयुः ॥ {40}

**(Both {39} and {40} appearing in T.B.2.4.1.4)**

---

**T.B.3.12.3.4 – अग्नि मूर्धा{41} भुवः{42}**

अग्निर्मूर्धा दिवः ककुत् पतिः पृथिव्या अयं ।
अपाꣳ रेताꣳसि जिन्वति ॥ {41}

भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः ।
दिवि मूर्धानं दधिषे सुवर्.षां जिह्वामग्ने चकृषे हव्यवाहं ॥ {42}

**(Both {41} and {42} appearing in T.S.4.4.4.1)**

**-------------------------------------------------------------------**

**T.B.3.12.3.4 – अनु नोऽद्यानुमति{43} रन्विदनुमतेत्वं{44}**

**Same as {25} and {26} above**

**-------------------------------------------------------------------**

**T.B.3.12.3.4 – हव्यवाह{45} स्विष्टं{46}**

**Same as {39} and {40} above**

**-------------------------------------------------------------------**

## Anuvakam 6

**in the entire 6th Anuvakam " सर्वास्ताः" appearing 16 times in short form which are highlighted by us in the text for identification. The expansion is as follows and is common for the all the 16 appearances.**

सर्वास्ता इष्टकाः कृत्वा । उप कामदुघा दधे ।
तेनर्.षिणा तेन ब्रह्मणा । तया देवतया-ऽङ्गिरस्वद्-ध्रुवा सीद ॥

**(Appearing in T.B.3.12.6.1)**

**--------------------------------------------------------------**

## Anuvakam 7

**in the entire 7th Anuvakam " सर्वास्ताः" appearing 13 times in short form which are highlighted by us in the text for identification.**
**The expansion is as follows and is common for the all the 13 appearances.**

सर्वास्ता इष्टकाः कृत्वा । उप कामदुघा दधे ।
तेनर्.षिणा तेन ब्रह्मणा । तया देवतया-ऽङ्गिरस्वद्-ध्रुवा सीद ॥

**(Appearing in T.B.3.12.7.1)**

**--------------------------------------------------------------**

**Anuvakam 8**

**in the entire 8th Anuvakam "सर्वा॒स्ताः" apperaing 7 times in short form which are highlighted by us in the text for identification. The expansion is as follows and is common for the all the 7 appearances.**

स॒र्वास्ता इष्ट॑काः कृ॒त्वा । उप॑ कामदु॒घा॑ दधे ।
तेनर्॒षिणा॑ ते॒न ब्रह्म॑णा । तया॑ दे॒वत॑या–ऽङ्गिर॒स्वद्–ध्रु॒वा॑ सीद ॥

**(Appearing in T.B.3.12.8.1)**

**---------------------------------------------------------------------------**

## 3.12 For Kaatakam - 3 (TB 3.12)

| | Dasini | Vaakyams |
|---|---|---|
| Anuvakam 1 | 1 | 10 |
| Anuvakam 2 | 9 | 161 |
| Anuvakam 3 | 4 | 44 |
| Anuvakam 4 | 7 | 121 |
| Anuvakam 5 | 13 | 129 |
| Anuvakam 6 | 6 | 60 |
| Anuvakam 7 | 5 | 51 |
| Anuvakam 8 | 3 | 33 |
| Anuvakam 9 | 8 | 88 |
| Total → | 56 | 697 |

## For Kaatakam - 1, 2 and 3

| | Anuvaakam | Dasini | Vaakyams |
|---|---|---|---|
| Prapaatakam1 | 11 | 49 | 526 |
| Prapaatakam2 | 10 | 62 | 593 |
| Prapaatakam3 | 9 | 56 | 697 |
| Total → | 30 | 167 | 1816 |

**Summary for entire Braahmanam**

| | Prapaatakam | Anuvakam | Dasini | Vaakyam |
|---|---|---|---|---|
| Ashtakam 1 | 8 | 78 | 500 | 5232 |
| Ashtakam 2 | 8 | 96 | 547 | 5795 |
| Ashtakam 3 | 9 | 134 | 619 | 6530 |
| Kaatakam | 3 | 30 | 167 | 1816 |
| Total | 28 | 338 | 1833 | 19373 |